वैयाकरणभूषणसारः

४८

४० पत्राणि

नं० ४८ घ
वैयाकरणभूषणसारः
५८ पत्राणि
सम्पूर्णम्
कर्ता: कौण्डभट्टः
लिपि सं. १८६५ (शके)

नं. ४८

ओंनमः



॥ कोराडभट्ट कृत भूषणसारस्थ पाणिनीयकृति गूढ विचारः।
वर्ततेत्र सुमनोहृतिसारः पाणिनीयपठितु वरे हारः॥

वै॰ भू॰ १

ॐश्रीगणेशायनमः॥ सरस्वत्यै॥ ॐश्रीलक्ष्मीरमणंनौमिगौरीरमणरूपिणम् स्फोटरूपंयतःसर्वंजगदेत
द्विवर्त्तते १ अशेषफलदातारंभवाब्धितरणेतरिम् शेषाशेषार्थलाभार्थंप्रार्थयेशेषभूषणम् २ पाणि
न्यादिमुनीन्द्राणाम्पितरंरङ्गोजिभट्टाभिधंध्येतत्प्रत्यूहनिवारणादिफलिकांभावंचवाग्देवताम् ढुण्ढिं
गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्सिद्धान्तानुपपत्तिभिःप्रकटयेतेषांवचोदूषये ३ ईप्सित
प्रतिबन्धकोपशमनायापेक्षितंश्रीफणिस्मरणरूपंमङ्गलंशिष्यशिष्यशिक्षार्थंनिबध्नन्चिकीर्षितंप्रति
जानीते॥ फणिभाषितभाष्याब्धेःशब्दकौस्तुभउद्धृतःतत्रनिर्णीतएवार्थःसङ्क्षेपेणेहकथ्यते १ उ
द्धृतइत्यत्रास्माभिरितिशेषः भाष्याब्धेःशब्दकौस्तुभउद्धृतइत्युक्तिस्तुशब्दकौस्तुभोक्तार्थानामाधुनि
कोत्रेतितत्वनिरासाय अन्यथातन्मूलकस्यास्यग्रन्थस्याधुनिकोक्तेरिवनसादरत्वापत्तेःपाणिनीया।
नामनुपादेयतापत्तेः तत्रनिर्णीतइत्युक्तिर्वितण्डाधिकजिज्ञासुभिःशब्दकौस्तुभेद्रष्टव्यमितिध्वनयि
तुम्॥ प्रतिज्ञातमाह फलव्यापारयोर्धातुराश्रयेतुतिङःस्मृताः फलेप्रधानंव्यापारस्तिङर्थस्तुविशेषण
म् २ धातोरित्यत्रस्मृताइतिवचनविपरिणामेनान्वयः फलेविक्लित्यादिव्यापारस्तुभावनाभिधासाध्यत्वे
नाभिधीयमानाक्रिया॥ उक्तंचवाक्यपदीये यावत्सिद्धमसिद्धंवासाध्यत्वेनाभिधीयते आश्रितक्रमरू
पत्वात्साक्रियेत्यभिधीयतइति १ नचसाध्यत्वेनाभिधानेमानाभावः पचतिपाकंकरोतीतिकृतिरि।
न्यादौयथानर्थावगमाविशेषेऽपिक्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैवमानत्वात् तथाचक्रियान्त
राकाङ्क्षानुत्थापकतावच्छेदकरूपंसाध्यत्वम् तद्रूपवत्त्वमसत्त्वभूतत्वम् एतदेवादायाःसत्वभूतोभाव ॐ॰ १

स्वतिङ्पदैरभिधीयत इति वाक्यपदीयमिति दृष्टव्यम् आश्रयं च व्यापारः फलकारवाधः संज्ञापनत्वपतनत्वादितत्तद्रूपेणवा

च्यः पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात् न च नानार्थतापत्तिः तद्वादिन्यायेन बुद्धिविशेषादेः श

क्यतावच्छेदकानामननुगमकस्य सत्त्वात् आख्याते क्रियैकत्वमस्याप्यवच्छेदकं बुद्धिविशेषेक्यमादायैव उक्तं त

वाक्यपदीये गुणभूतैरवयवैः समूहः क्रमजन्मनाम् बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते १ धात्वर्थ

निरूप्य तिङर्थमाह आश्रये तिति फलाश्रये व्यापाराश्रये चेत्यर्थः फलाश्रयः कर्म व्यापाराश्रयः कर्ता तत्र फ

लव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिरन्यलभ्यत्वात् शक्यतावच्छेदकं चाश्रयत्वं तत्तच्छक्ति विशेषरूप

मिति स्ववर्थे निर्णयेवक्ष्यते नन्वनयोराख्यातार्थत्वे किं मानं श्रुतीनेर्लक्षणयातेपाम्यथमात्रपदाद्धा समभ्भा

वादिति चेत् अत्रोच्यते लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रमेव मानम् अत्र हि चकारात्कर्तरि कृदिति ।

सूत्रोक्तं कर्तरीत्यनुकृष्यते बोधकतारूपेण निवादि शक्तिस्तस्या तिनेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि

कर्तरि चानेन विधीयन्ते न तकारविसर्गादि निष्ठा कर्मकरणादि बोधकशक्तिमादाय शमादिविधानवत् न च सूत्रे क

र्तृकर्मपदे कर्तृत्वकर्मत्वपरे तथा च कर्तृत्वे कृतिः कर्मत्वं च फलमेवार्थो स्त्विति शङ्क्यम् फलव्यापारयोर्धातुलभ्य

त्वेन लकारस्तावपुनस्तत्र शक्तिकल्पनायोगात् अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकार

विधिः स्यादिति चेत् र्हि कृतामपि कर्तृकर्मादिवाचित्वं न सिध्येत् कर्तरि कृदिति च लः कर्मणीत्यनेन तुल्ययोग

क्षेमम् अपि च मीमांसकानां कृतामिवाख्यातानामपि कर्तृवाचित्वमस्तु भावनायाः प्रत्ययेन कृदादिवन्न्यती

तिसमभ्भवे वाच्यमास्तु तथा सति प्राधान्येन तस्यान्यस्यादिति चेन्न यदमानयेम्यादावादेपितव्यक्तेरपि प्राधान्यव

दुपपत्तेः पचतीत्यादौ भावनाया विवरणादर्शनाद्वाच्यत्वमिति चेन्न पाकानुकूलव्यापारवत्त्वः कर्तुरपि विवरणा

वदितरेतरयोगद्वन्द्वे साहित्यांशाविवरणवद्वाननुदर्थे निर्णयकमिति वाच्यम् भावनायामपि तुल्यत्वात्

विषयत्वा विशेषात् न च कर्तुर्विवरणं तो सत्त्वापि विवरणं पाकं करोतीत्यर्थोऽधिकस्य विव रणं = २

ॐ वै० भू० २

2

किञ्चैवं सति देवदत्तः पचतीत्यत्राभेदान्वयदर्शनात्कर्तैव वाच्य इत्यावश्यकम् पक्ता देवदत्त इति न चाभेदबोधे समा
नविभक्तिकत्वं नियामकं तच्चात्र नास्तीति वाच्यम् सोमेन यजेत स्तोकं पचति राजपुरुष इत्यादावप्यभे
दबोधान्नामार्थः न च लक्षणया कर्तृवाचकत्वात्सामानाधिकरण्योपपत्तिरित्यादियौगिकानामपि दृष्टत्वा
च्चित्तानापत्तेः एवं चैत्स्य देवीत्यादिनानामणि अनेकमन्यपदार्थे सास्य देवतेत्यादिशासनेनापि पिङ्गस्त्वणी
यस्याविशेषे देवादेवतानाम्प्रत्यय इति नियमदर्शनात्प्रधानषष्ठ्यर्थ एवात्र शासनलाभात् तथा चारुण्याधि
ङ्गल्यैकहायन्या सोमं क्रीणातीति वाक्ये द्रव्यात्मके आरुण्यस्य स्वकर्मणा पात्र द्रव्यमेवान्यप्रतिपादका
रुण्याधिकरणोद्धेदापत्तिः द्रव्यवाचकत्वसाधकस्य लघुन्यत्तेः सामानाधिकरण्यस्योक्तरीत्योपपत्तेरि
ति प्रपञ्चितं विस्तरेण हरिदीक्षिते व्याकरणभूषणे तिङ् इति बोधकतारूपा शक्तिस्तिङः समभिव्याहृतं पदा
र्थे निरूप्य वाच्यार्थं निरूपयति फलव्यापारादि विक्लित्यादिफलं प्रति तिङर्थः कर्तृकर्मसंख्याकालाश्चक
र्तृकर्मणी आश्रयौ फलयोर्विशेषणे संख्या कर्तृप्रत्यये कर्तरि कर्मप्रत्यये कर्मणि समानप्रत्ययोपात्तत्वात्
तथा चाख्यातार्थसंख्याप्रकारकबोधं प्रत्याख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः
फलितः नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थ एवान्वयादाख्यातार्थसंख्याप्रकारक
बोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावो वाच्यः सोऽपि चन्द्र इव मुखं दृश्यते
देवदत्तो भुक्त्वा व्रजतीत्यादौ चन्द्रवक्त्रार्थयोराख्यातार्थेनान्वयादितरविशेषणत्वघटितत्वेनाति
गौरवम् इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे कालस्तु व्यापारविशेषण
म् तथाहि वर्तमाने लडित्यत्राधिकाराद्धातोरिति लब्धम् तच्च धात्वर्थचरत्वाधान्याद्व्यापारस्यैव ग्राह्य इतीति तत्रे
वतदन्वयः न च संख्यावत्कर्तृकर्मणोरेवान्वय इति शङ्क्यः अतीतभावनाकः कर्तेति पचतीत्यापत्तेः पाकानारम्भदशायां कर्तृ ॐ २

सत्वेपच्यतीत्यनापत्तेस्तुनापिफलेनतदन्वयः फलातिरत्यविदस्यायोग्यापारसत्वेपचतीत्यनापत्तेस्तु पच्यतीत्यापत्तेश्च
त्यवधेयं नचामवानजरीहृतनकलेवरस्योत्यानातिरूहलयत्नसत्वाञ्जविष्टनीतिप्रयोगापत्तिः परयत्नस्यातिनादप्रयो
गात्किंचिच्छेष्टादिनावगतोचायप्रविष्टति शङ्काभावात्फलंतन्नजायते इतिलोकप्रतीतेर्विष्टत्वात् एवंनिरूपेविशे
षणमेवभावनैवप्रधाने यद्यपिप्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैवप्राधान्यमन्यत्रदृष्टम् तथापिभावप्रधानमाख्या
तेसत्वप्रधानानिनामानि इतिनिरुक्तसूत्रादिस्मृत्यादेस्यक्रियाप्राधान्यबोधकभाष्याभ्या धात्वर्थभावनाप्राधान्यमध्य
ध्यवसीयते अपिच भाष्याख्यानार्थप्राधान्ये तस्यदेवदत्तादिभिः समभेदान्वयात्प्रथमान्तस्यप्राधान्यापत्तिः । तथाच
पकमृगाभिन्ना श्रधिकायावर्त्तमानाधावनक्रियानाद्विषयकं यदिष्टसाधनीभूतंदर्शनेनतदतिहूलाभावनेत्यर्थः
पश्यमृगोधावतीत्यत्रभाष्योक्तैकवाक्यतानस्यात् प्रथमान्तस्यमृगस्यधावनक्रियाविशेष्यस्यदृशक्रियायां
कर्मत्वापत्तौ द्वितीयापत्तेः नचैवमप्रथमासामानाधिकरण्याच्छत्रप्रसंगः एवमपिद्वितीयायायाङ्कवीरत्वेन पश्यमृ
ग इत्यादिवाक्यस्यैवासंभवापत्तेः नचपश्येत्यत्रनमित्यध्याहार्येवाक्यभेदप्रसंगात् उत्कटधावनक्रियाविशे
ष्यस्यैव दर्शनकर्मतयान्वयस्यप्रतिपिपादयिषितत्वादध्याहारेनन्वयापत्तेश्च एवंचभावनाप्रकारकबोधेप्र
थमान्तपदजन्योपस्थितिः कारणमितिनैयायिकोक्तं नादरणीयं किंतु भाष्याख्यानार्थकात्प्रकारकबोधेधातुजा
न्योपस्थितिः भावनात्वावच्छिन्नविषयतयाकारणमिति कार्यकारणभावोऽभीष्टः भावनाप्रकारकबोधंप्रतित
द्वजन्योपस्थितिवत् धात्वर्थभावनोपस्थितिरेवहेतुः पश्यमृगोधावति पचतिभवतीत्यत्ररोधादिनिदिक् इत्थं
चपचतीत्यत्रैकाश्रयकापाकानुकूलाभावनाप्रतीयते इत्यत्रैकाश्रयकायाविक्लित्तिस्तदनुकूलाभावनेतिबोधः

धा॰ सु॰ २

3.

देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्तृत्वादिभिन्नत्वस्याभेदान्वयः यदोदनं पचतीत्यत्रापि देवदत्ताभिन्नाश्र
यकोदनाश्रयानुकूलो व्यापार इति बोधः स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम्
अत एव तस्मिन्सत्योदनं पचति न दृश्यते नष्टः तद्भावित्वेन पचतीति प्रयोगः देवदत्तो जानाति इच्छतीत्यादौ च
देवदत्ताभिन्नाश्रयको ज्ञानेच्छानुकूलो वर्तमानो व्यापार इति बोधः स चानन्ताश्रयतैवेतिरीत्याश्रयम्॥ नर
त्वाख्यातस्य कर्तृत्वकर्मत्वशक्तत्वेन पचतीत्यत्रोभयबोधापत्तिः कर्तृमात्रबोधवत्कर्ममात्रस्यापि बोधापत्तिरि
त्यतस्तात्पर्यग्राहकमाह ॥ फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः व्यापारे शप्श्नमाद्यास्तु द्योतयं
त्याश्रयान्वयम्॥ तङादयः फले आश्रयान्वयं द्योतयंति फलाश्रयस्य कर्मत्वात्तङ्यक्चिणादयः कर्मद्योतकाः
व्यापाराश्रयस्य कर्तृत्वाच्छप्श्नमादयः कर्तृद्योतका इति समुदायार्थः द्योतयंतितात्पर्यंग्राहयंति नन्वेवं क्र
मादसुनादस्य बोधिमसूत्यादौ पच्यते ओदनः स्वयमेवेत्यादौ च व्यभिचारः कर्मणः कर्तृत्वविवक्षायां क
र्तरि लकारे सति कर्मवत्कर्मणा तुल्यक्रियः इत्यतिदेशेन यगात्मनेपदचिण्वदिटामतिदेशाद्यगादिमत्त्वे
पि कर्तृत्वेव बोधाद्व्यापारएवाश्रयान्वयात् अबोधीत्यत्रापि बुध्यतेः कर्तरि लङ् तस्य दीपजनेति चिण् वि
णो लुगिति तस्य लुगिति साधनादित्याशंकायामाह ॥ उन्नेयोयं कर्मकर्तृविषयादौ विपर्ययात् तस्मा
द्यथोचितं तङ्ङयंद्योतकत्वं यथागमम् कर्मकर्तृविषयादौ पच्यते ओदनः स्वयमेवेत्यादौ अत्र ह्योदनाभि
न्नाश्रयकः पाकानुकूलो व्यापार इति बोधः क्रमादित्यादिपदग्राह्यम् अत्र सामान्यविशेषज्ञानदर्वक
पकनादविषयकज्ञानानुकूलः कृसाभिन्नाश्रयको तीतो व्यापार इति बोधः यथोचितमितिसकर्मका

धातुसमभिव्याहृतभावसाधारणविधिविधेयविषयागादिकर्मद्योतकामितिभावः एवंसूत्रीकृता
हन्यायेनसोपपत्तिकंवाक्यार्थमुपवर्ण्यफलव्यापारयोरितिप्रतिज्ञातंतथानोव्यापारवाचित्वंलडादे
र्भावनायाश्चवाच्यत्वंवदतःप्रभाकरादीन्प्रतिव्यवस्थापयति ॥ व्यापारोभावनासैवोत्पादनासैव
चक्रिया कृञोऽकर्मकतापत्तेर्नहियत्नोऽर्थइष्यते ॥ पचतिपाकमुत्पादयति पाकानुकूलभा
वनातादृश्युत्पादनेतिविवरणाद्धिक्रियमाणस्यापितद्वाचकतेतिभावः व्यापारपदंफूत्कारादीना
मयत्नानामपिफूत्कारत्वादिरूपेणवाच्यतांबोधयितुमुक्तं अतएवपचतीत्यत्राधःसंतापनत्वफू
त्कारत्वचुल्ल्युपरिधारणत्वयत्नत्वादिभिर्बोधःसर्वसिद्धः नचैवमेषांशक्यतावच्छेदकत्वेगौरवा
पत्त्याकृतित्वमेवतदवच्छेदकंवाच्यम् रथोगच्छतिजानातीत्यादौचव्यापारादिप्रकारकबोधोलक्षण त्वा॰
येतिनैयायिकरीतिःसाधीशक्यतावच्छेदकत्वस्यापिलक्ष्यतावच्छेदकवद्गुरुणिसंभवात् नयावैष
म्येबीजाभावात् नचपचतिपाककरोतीतियत्नार्थककरोतिनाविवरणाद्यत्नएवार्थइतिवाच्य
म् रथोगमनंकरोतिबीजादिनांकुरःकृतइतिदर्शनात्कृञोयत्नार्थकतायाअसिद्धेरिति किंचभा
वनायाश्चवाच्यत्वेघटंभावयतीत्यत्रेवघटोभवतीत्यत्रापिद्वितीयास्यात् नचात्रघटस्यकर्तृत्वेनतस्या
न्नयाकर्मसंज्ञयावाधान्नद्वितीयेतिवाच्यम् अनुगतकर्तृत्वस्यत्वन्मतेदुर्वचत्वेनघटस्याकर्तृत्वात् कृत्या
श्रयत्वस्यकारकचक्रप्रयोक्तृत्वस्यवाघटादावभावात् धात्वर्थानुकूलव्यापाराश्रयत्वस्यचकारकमात्रा
तिव्यापकत्वात् अपिचभावनायाश्चवाच्यत्वेधातूनांसकर्मकत्वाकर्मकत्वविभागउच्छिन्नःस्यात्तस्यार्थ

नै॰३

वै. भू. ४

फलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनाया वाच्यत्व
मंतरेणासंभवि अन्यतमत्वं नादितिचेन्न एकस्यैवार्थभेदेनाकर्मकत्वस[illegible]कर्मकत्वदर्शनात् तदेतदभिसं
धायाह कृञ्ज इति अयंभावः व्यापारावाच्यत्वपक्षे फलमात्रमर्थ इति फलितम् तथाच करोतीत्यादौ य
त्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम् तथाच यतते प्रयत्नेऽ इतिवत्फलस्थानीययत्नवाचकत्वाविशेषादक
र्मकत्वापत्तिः करोत्यादेर्वाच्येति तथाच नहि यत्न इत्यत्र फलस्थानीययत्नेनेति शेषः कृञ्ज इति धात्वर्थाप
लक्षणं सर्वेषामप्यकर्मकता सकर्मता वा स्यादिति भावः अथवा व्यापारो भावनेत्यर्थेन व्यापारस्य वाच्यत्वं
प्रसाध्य फलांशस्यापि तत्साधयन्नैयायिकाभ्युपगतं जानाति कृञ्जादेः केवले ज्ञान यत्नादिक्रियामात्रवा
चित्वं दूषयति कृञ्ज इति अयंभावः फलांशस्या[illegible]वाच्यत्वे व्यापार एव धात्वर्थः स्यात् तथाच स्वार्थफलव्यधि
करणव्यापारवाचित्वादिरूपासकर्मकत्वोच्छेदापत्तिः नच कृञ्जादौ सकर्मकत्वव्यवहारो भाक्त इति नैयायि
कोक्तं युक्तम् व्यवहारस्य भाक्तत्वेपि कर्मणि लकारासंभवात् नहि तीरे गंगापदस्य भाक्तत्वेपि तेन स्नाना
दिकार्यं शक्यं कर्तुम् एवंच नहि यत्न इत्यत्र यत्नमात्रमित्यर्थः अत एवाह ॥ किंतूत्पादनमेवातः कर्म
वत्स्याद्यगाद्यपि कर्मकर्तर्यन्यथा तन्न भवेद्धूपोपिवि ॥ उत्पादनं उत्पत्तिरूपफलसहितं यत्नादि कृञ
र्थ इत्यर्थः फलस्य वाच्यत्वे युक्त्यंतरमाह अत इत्यादि यतः कृञो यत्नमात्रमर्थो नेष्यते अतः कर्मवदि
तिपदेन कर्मवत्कर्मणा तुल्यक्रिय इति सूत्रे लक्ष्यते अयमर्थः यत एतस्योत्पादनार्थकता अतः पच्यते ओ गो. ४
दनः स्वयमेवेतिवत् क्रियते घटः स्वयमेवेति यगादयोप्युपपद्यंते अन्यथा यत्नस्य कर्मानिष्ठत्वाभावात्तन्न र

स्यात्कृषिवत् यथा दृश्यते चैत्रः स्वयमेवेति दर्शनस्य चैत्रादिनिष्ठत्वात् तथा यत्नस्यापीति तथा प्रयोगानापत्ते
रिति ॥ नन्वेवं ज्ञानादेर्विज्ञानात्मादेरपि विषयावच्छिन्नावरणभंगादिफलवाचित्वमावश्यकम् अ
न्यथा सकर्मतानापत्तेः तथा च ज्ञायते चैत्रः स्वयमेवेति किं न स्यात् एवं ग्रामो गम्यते स्वयमेवेत्याद्यपीत्या
शंकां मनसि कृत्वाह ॥ निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यव
स्थितः ॥ ईप्सितं कर्म त्रिविधं निर्वर्त्यं विकार्यं प्राप्यं च तत्राद्ययोः कर्मवद्भावः नान्त्ये प्राप्यत्वं चास्य क्रिया
कृतविशेषानुपलभ्यत्वमिति स्वबर्थनिर्णये वक्ष्यते तेन स्वयं चैत्रः केनचिद्दृष्टो ग्रामो यं केनचिद्गत इति
प्राकट्ये कर्मदर्शनेनावगतम् घटं करोतीति निर्वर्त्यं सोमं सुनोतीति विकार्यं च तज्ज्ञाने प्राकट्यमिति न त
त्प्राप्यम् तथा च चैत्रादेर्दृश्यादौ प्राप्यकर्मत्वान्नोक्तातिप्रसंग इति भावः धातूनां फलवाचकत्वे त्य
जिगम्योः पर्यायतापत्तिः क्रियावाचकत्वाविशेषात् फलस्योपलक्षणत्वेप्येकक्रियायाः एव पूर्वदेश
विभागोत्तरदेशसंयोगजनकत्वादुक्तदोषस्य तादवस्थ्यमित्यपि वदन्ति तस्मादावश्यकं सकर्मका
णां फलवाचकत्वमकर्मकाणां तु तन्निर्विवादमेव भूसत्तायामित्याद्यनुशासनाच्च अत एव द्व्यर्थः प
चिरिति भाष्यं संगच्छते इत्यादिक् एवं सिद्धान्तफलव्यापारयोर्वाच्यत्वे किं त्वाख्यातवाच्यैव सा भावना न
धातोः प्राधान्येन प्रतीयमानव्यापारस्य धात्वर्थतायाः प्रकृतिप्रत्यययोः प्रत्ययार्थस्य प्राधान्यमिति न्या
यविरुद्धत्वात् तदागमे हि दृश्यते इति न्यायविरुद्धत्वाच्च एवं च स यत्नाख्यातार्थव्यापारव्यधिकरणफ
लवाचकत्वं सकर्मकत्वमाख्यातार्थव्यापाराश्रयत्वं च कर्तृत्वं वाच्यमित्यादि वदन्तं मीमांसकंमन्यं प्रत्या

वै॰ भू॰ ५ हृ ॥ तस्मात्करोतिर्धातोः स्याद्व्याख्यानं तत्वसौ निजं पक्ववान्कृतवान्पाकं किं कृतं पक्वमित्यपि ॥ तस्मा
दभिप्रायस्य हेतोः सचेत्स्यं फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवानिति प्रतीत्यापत्तिः संयोगाश्रयत्वात् फ
लानुत्पाददशायां व्यापारसत्त्वे पाको भवतीत्यनापत्तिः व्यापारविरामे फलसत्त्वे पाको विद्यते इत्यापत्तिश्च
5 यत्तु भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति तन्न कर्त्राख्यानवत्कर्तरि क्तादित्य
न एव तद्विधानलाभे भावे विधायकानुशासनवैयर्थ्यापत्तेः तद्विरोधापत्तेश्च अथ व्यापारोपि धात्वर्थ इत्य
भ्युपेयामिति चेत्तर्हि धातुनैव सकलव्यापारलाभसंभवेनाख्यातस्य पृथक्शक्तिकल्पने गौरवमिति
पचतीत्यस्य पाकं करोतीति विवरणात्स्मात्करोतिर्धातोरेव व्याख्यानं विवरणम् अतस्तदपि नाख्यातार्थे
त्वे साधकमिति भावः मीमांसकोक्तं बाधकमुद्धरंस्तन्मतं दूषयति नन्वित्यादिना नासौ निजं व्याख्यानं प
क्ववानित्यादावनन्वयापत्तेरित्यर्थः अयं भावः प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थप्राधान्यमिता
क॰ स्याहि विशेष्यतया प्रकृत्यर्थप्रकारकबोधं प्रति तद्वत्तरप्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावः फ
लितः तथा च पक्ववानित्यत्र पाकः कर्मकारकं क्तवतुप्रत्ययार्थः कर्तृकारकं तयोश्चाहृणाधिकरण
रीत्यावत्प्रमाणस्सङ्गीत्याचान्वयासंभवादिति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाभावेन प्रधान्यबोध
कउक्तकार्यकारणभावः नच संबंधमात्रमुक्तं चक्रन्यायाधात्वर्थभावयोः तदेकांशनिवेशोत व्यापारेस्या भू॰
न विद्यते इति भट्टपादोक्तरीत्या संबंधसामान्येन कारकाणामन्वयः शक्यः योग्यताविरहात् अन्वयप्रयोज ५

कर्तृत्वस्यतत्त्वात् क्रियान्वयित्वमेवहिकारकान्वयित्वावच्छेदकमितिवक्ष्यते तदेतदाविष्कर्तुंवि
वरणेनधात्वर्थञ्चकर्तृत्वर्थयोः कर्मत्वकर्तृत्वेदर्शयति कृतवान्याकामितिवक्तृतः प्रत्ययार्थः प्रधानमि
त्यस्यायः प्रधानेसप्रत्ययार्थएवेतिवायः प्रत्ययार्थः सप्रधानमेवेतिविधानार्थः प्रजाप्रस्थाख्याणी
त्यादौसत्त्वप्रत्ययार्थस्त्रीत्वस्यैवप्राधान्यापत्तेः छागादेरनापत्तेश्च किंतत्त्वर्गीयेविशेष्यत्वादि
नावबोधस्तत्तथाप्रत्ययान्तरोधात् अतएवनैयायिकानांप्रथमान्तविशेष्यकएवबोधः लक्षण
यामालंकारिकाणांश्रावकत्वावच्छेदप्रकारकएवबोधोननैयायिकादीनांघटःकर्मत्वमित्यादौ
विपर्ययेणापिव्युत्पन्नानांनैयायिकतव्यादीनांबोधोनव्युत्पत्तिरहितानामन्येषांतेषांतन्निराका
त्वमेवेत्यादिकंसंगच्छते अतएवप्रधानेप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वादित्याहभगवान्पा
णिनिः प्रधानेप्रत्ययार्थइतिवचनेनकार्यमर्थस्यतथाबोधस्यान्यप्रमाणत्वात् त्यज्यतेसावित्या
दिनाहितत्वर्थः एवंसत्यपिनियामकानामपेक्षणेचभावप्रधानमाख्यातमितिवचनमेवशरण्यता
मितितदर्थोभिहितः तदाहमेहोतित्यायोविवरणेचान्तिव्याप्तमित्याह किंकृतंपक्तामिति कृञावि
वरणेप्रत्तोतिस्त्वपक्तामित्यत्रापिभावनावाच्यास्यादितिभावः नन्वस्तुतिङ्उ्वकृतामपिभावनावाच्ये
त्यतआह अपीति तथाचोभयसाधारणेनतन्मतीतेरुभयसाधारणोधात्वेवएववाचकइतिभावः
भवद्योत्याप्रत्ययार्थत्वात्प्राधान्यापत्तिश्चेतिद्रष्टव्यम् आपादसधात्वर्थत्वेसाधकोत्तरमाह ॥ किं

वै· भू·

6

कार्यं पचनीयं चेत्यादि दृष्टं हि क्तत्वापि किंच क्रियावाचकतां विना धातुत्वमेव न ॥ कार्यमित्यत्र अर्ह
लोऽर्थे इति कर्मणि ण्यत् पचनीयमित्यादौ चानीयर् आदिना ज्योतिष्टोमयाजी इत्यादौ णिनिः करणेउ
पपदे कर्तरि एते च क्रियायोगमन्तरेणासत्त्वं न तद्वाच्यतां बोधयन्ति विना क्रियां कारकत्वासंभवेन तद्वाच
कप्रत्ययस्याप्यसंभवात् न च गम्यमानां क्रियामादाय कारकयोग इति भाष्ये रीतिर्निर्युक्ता आख्यातेऽपि त
थात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः अथ लिंगसंख्यान्वयानुरोधात् कर्तुर्वाच्यत्वमावश्य
कमिति तेनाक्षेपाद्भावनायाः प्रत्ययः स्यादिति मतम् तर्हि संख्यान्वयोपपत्तेः ण्यन्तेऽपि कर्ता वाच्यः स्या
त् पक्ववानित्यादौ कालकारकान्वयानुरोधाद्भावनाया अपि तस्यावश्यकत्वाच्चेति भावः अपिना हेत्वन्तर
समुच्चयः तथा हि न वै भिन्नो न चाभिन्नः हरिणा त्रातो हरित्रात इत्यादौ कर्तृकरणे कृता बहुलमिति स
मासो न स्यात् पुरुषो राज्ञो भार्या देवदत्तस्येतिवत् सामर्थ्यात् न चाध्याहृतक्रियाद्वारा सामर्थ्यं वाच्यं दध्यो
दनः गुडधाना इत्यादिवत् अन्यथात्रापि नव्यंजनं भक्षणमिश्रीकरणमिति समासो न स्यादिति वाच्यम् न
त्र विधिर्निरर्थकः स्यादगत्या तथा स्वीकारेऽपि हरिकृतमित्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य कर्तृकरण
कृत्समासस्याक्षेपेण परम्परासंबंधे प्रवृत्त्ययोगात् न चैकस्यां क्रियायामन्वयित्वमेव सामर्थ्यमिति शंक्यम्
अहं प्रथमः इत्यादेरसमर्थसमासत्वानापत्तेः इष्टापत्तावुक्तः सर्वो द्वन्द्वो विकल्पेत्यत्रोक्तः सर्वद्वन्द्विकश्
त्वापत्तेः न चात्र समासविधायकाभावः सह सुपेत्यस्य सत्त्वात् अन्यथासमर्थसमासोऽपि विधायकाभा

गो· ६

वान्नस्यादिति किंचभावनायास्तिङर्थत्वेभावयतित्वदमितिवङ्गवातित्वदमित्यपिस्यात् धात्वर्थ
फलाश्रयत्वरूपकर्मत्वसत्वात् नचाख्यातार्थव्यापाराश्रयत्वेनकर्तृत्वान्नत्संज्ञयाकर्मसंज्ञाया
वाधान्नद्वितीयेतिवाच्यम् आख्यातार्थव्यापाराश्रयत्वस्यकर्तृत्वेपाचयतिदेवदत्तोविश्वामित्रेण
त्यत्रविश्वामित्रस्याकर्तृत्वापत्तेस्तृतीयानापत्तेः ग्रामंगमयतिदेवदत्तोविश्वामित्रमित्यत्रविश्वामि
त्रस्याकर्तृत्वापत्तेर्ग्रामस्यगामिकर्मतानापत्तेश्च तथाचग्रामायगमयतिदेवदत्तोविश्वामित्रमित्य
पिनस्यात् गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनीतिगत्यर्थकर्मण्येवचतुर्थीविधानात्
एतेनाणिजंते आख्यातार्थउभयंतत्राश्रयत्वाद्देवदत्तयज्ञदत्तयोःकर्तृतेत्यपास्तम् किंचतस्मिन्नयो
गेयआख्यातःस्त्यस्यावश्यकत्वेनाख्यातस्तून्येदेवदत्तःपक्तेत्यादौदेवदत्तस्याकर्तृतापत्तेरितिदिक्
स्तत्रानुपपत्तिमपिमानत्वेनप्रदर्शयन्नकार्थस्यव्याख्येत्वंनिरस्यतिकिंचेति धातुसंज्ञाविधायक
केभूवादयोधातवइतिसूत्रम् तत्रभूश्चवाश्चेतिद्वंद्वः आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः
ततोभूवावादीयेषामितिबहुव्रीहिः [illegible] तथाचभूप्रभृतयोवासदृशाधातवइत्यर्थः तत्रक्रिया
वाचकत्वेन तथाचाक्रियावाचकत्वेसतिगणपठितत्वंधातुत्वंपर्यवसन्नम् अत्राक्रियावाचित्वमात्रोक्तौ
वर्जनादिरूपक्रियावाचकोहिरुक्नानेत्यादावतिव्याप्तिरितिस्यादिगणपठितत्वमुक्तम् ५ ॥ ताव
न्मात्रोक्तौचाह ॥ सर्वनामाव्ययादीनांयावादीनांप्रसंगतः नहितत्यादमात्रेणाफलमित्याकरेस्फुटं

वै॰ भू॰ १

7

गणपठितत्वमात्रोक्तौ सर्वनाम्नोऽव्ययस्यापि धातुत्वं स्यात् तथा च यः सर्वः पश्यतीत्यादावातो धातोरित्याकारलो
पापत्तिः न च लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणं तस्य लाक्षणिकत्वादिति
तत्राह वेत्यादि अव्यये वा इत्यादावपि प्रसंगः तादृशस्यैव गणेऽपि पाठनिर्णयसंभवात् तथा च विकल्पा
र्थको वातीति प्रयोगः स्यादिति भावः न च गतिगंधनाद्यर्थनिर्देशो नियामकः तस्यार्थानादेशादिति भाष्य
पर्यालोचनयाधुनिकत्वलाभात् ॥ १० ॥ नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं क्रिया च
धात्वर्थ एव न व्यापार इत्याशंकां समाधत्ते ॥ धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता अन्योन्यसंश्र
यः स्पष्टस्तस्मादस्तु यथाकरम् यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्र
हः क्रियात्वग्रहे तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति ग्रहपदं दर्शयित्वा व्या
ख्येयम् यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ग्रहे वाप्रतिबंधकत्वाभ्युपगमेनासंगत्यापत्तेः न चान्यतमत्वं
धातुत्वम् भूवादयस्तस्यैव यथार्थापत्तेरित्यभिप्रेत्याह अस्त्विति व्यापारसंतानः क्रिया तद्वाचकत्वे स
ति गणपठितत्वमित्यर्थः ननु सन्नादीनां लोपानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्वलक्ष
णमुच्यतां धात्वर्थत्वाद्येषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यत इति चेन्न अन्यतमत्वे
विकल्पस्यापि विकल्पयतीति प्रयोगानुरोधात् प्रवेशावश्यकत्वेन तदर्थके वेत्यव्यये उक्तरीत्या गणप ग्रं॰ ८
ठितत्वसत्त्वेनातिव्याप्तेरिति ॥ ११ ॥ नन्वस्यैव धातुत्वे अस्तीत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तद्वा

न॰

चकानामथातत्त्वप्रसंगइत्यतआह ॥ अन्यत्रापिचधर्म्यंशोभाव्यत्वेनैवहिभावना अन्यत्राशेषभा॰
वात्तुमानत्वानप्रकाशते ॥ अन्यत्रादौअभवदित्यादौधर्म्यंशोधर्मिभावेभाव्येभाव्यत्वेनाविवक्षितेनअस्ये
वप्रतीयतएव अयमर्थः सतनोगतोनवेतिप्रश्नेमहतायत्नेननिष्टत्तीतिप्रयोगेसत्तानुकूलाभा॰
वनाप्रतीयतएवउत्पन्नादिबोधनेतुसतनगंतोहितोलोहितादासीहृत्पुलसप्ततोभवदित्यादिदर्श
नात् किंचात्रभावनाविरहेलडादिव्यवस्थानस्यात् तस्याएवचवर्तमानत्वादिविवक्षायांतद्वि
धानात् क्रियाभेदायकालस्तुसंख्यासर्वस्यभेदिकेतिवाक्यपदीयादिति नन्वेवमस्तीत्यत्रस्पष्टे
उक्तेननुध्यतेइत्यतआह अन्यत्रेति अशेषभावाद्भावनायाः फलसमानाधिकरणत्वात् तथाच
भावनायाः फलसामानाधिकरण्यंतत्त्वस्पष्टत्वेदोषइतिभावः नन्वेवंकिंकरोतीतिप्रश्नेपचतीत्यु
त्तरमिवास्तीतिस्यादितिचेत् इष्टापत्तिः आसन्नविनाशंकिंचिड्हिष्यकिंकरोतीतिप्रश्नेअस्ती॰
सर्व॰ त्युत्तरस्यसुसमन्तत्वात् इतरथात्वसत्त्वस्यनतयानिश्चितेकिंकरोतीतिप्रश्नः पाकादिविशेषगोचरएव॰
वेत्यवधारणादस्तीतिनोत्तरमिति ॥ १२ ॥ ननुभावनायाः फलनियतत्वात्फलाश्रयस्यचकर्मत्वा
त्सर्वेषांक्रियावाचकत्वेसकर्मतापत्तिरित्यतआह ॥ फलव्यापारयोरेकनिष्ठतायामकर्मकः धा॰
तुस्तयोर्धर्मिभेदेसकर्मकउदाहृतः ॥ एकनिष्ठतायांएकमात्रनिष्ठतायांभिन्नाधिकरणवृत्तिता॰
यामितियावत् तेनगम्यादौफलस्योत्तरदेशसंयोगत्वेपिनदोषः कर्तृनिष्ठत्वेपिनातिव्याप्तिः अकर्म

वै॰ भू॰ ५

कोयष्टिन्यादिः तयोःफलव्यापारयोराश्रयभेदे सकर्मकइत्यर्थः उक्तंचवाक्यपदीये आत्मानमात्मनाबि
भ्रदस्तीतिव्यपदिश्यते अंतर्भावाच्चतेनासौकर्मणानसकर्मकइति बिभ्रदितितेनस्वधारणानुकूलोव्या
पारोत्रापिगम्यतइतिभावः तेनकर्मणासकर्मकत्वंतन्नअंतर्भावात् फलांशेनसमानाधिकरण्यसत्त्वा
8 दित्यर्थः आत्मानंजानातिइच्छतीत्यादौचद्वावात्मानौशरीरात्मांतरात्माचतत्रांतरात्मानंकरोतिये
नशरीरात्मासुखदुःखेअनुभवतीतिकर्मवत्कर्मणेतिसूत्रीयभाष्यान्नकरीत्याभिन्नाधिकरणनिष्ठता
मादायसकर्मकत्वमित्यवधेयम् ॥ १३ ॥ नन्वसत्त्वभूतक्रियायाधात्वर्थत्वेपाकइत्यत्रापितत्प्रत्य
यापत्तिः नचेष्टापत्तिः कृदभिहितोभावोद्रव्यवत्प्रकाशतइतिभाष्यविरोधादित्यतआह ॥ आख्या
तशब्देभागाभ्यांसाध्यसाधनवर्तिता प्रकल्पितायथाशास्त्रेसघञादिष्वपिक्रमः ॥ आख्यातशब्दे प
श्यन्नेगोधावतीत्यादौभागाभ्यांनिर्दि.ताभ्यांप्रकृतिप्रत्ययभागाभ्यामितिविवरणकारोक्तमपव्याख्या
नंपचतीत्यत्रापिभागद्वयसत्त्वात् साध्यसाधनरूपतायथाक्रमंग्राह्यासाध्यत्वेक्रियांतराकांक्षानुत्था
पकरूपवत्त्वम् साधनत्वंकारकत्वेनान्वयित्वम् सघञादिष्वपीतिप्रकृत्यासाध्यावस्थाप्रत्ययेनसाधना
वस्थाइत्यन्विशेषः व्रज्याक्षपक्ष्याप्यालिंगसंख्यान्वयिनीकारकान्वयिनीच आख्यातेतोपात्तनैवं नो॰
तथापिकारकत्वेनान्वयित्वमात्रेणदृष्टान्तदार्ष्टांतिकतेत्यवधेयम् नचघञंतधातुनातथाभिधाने भू॰
मानाभावः ओदनस्यपाकइतिकर्मणिषष्ठ्यामानत्वात् नचभवतीत्यत्राहूतक्रियान्वयात्षष्ठी कर्तृक ५

मेणोः कृतीति कृदंतेन योग एव तद्विधानात् न लोकाव्ययनिष्ठाखलर्थतृनामिति लादेशयोगे ष-
ष्ठीनिषेधाच्च एवं शैत्यात्काष्ठैः पाक इत्यादौ पीहमेव एवं फलाश्रयोऽपि धात्वर्थनासत्त्वावस्थापन्न एवो-
च्यते अत एव लोकं पचतीतिवल्लोकं पाक इत्ययमप्रयुज्यते ४५ ॥ एतदेव स्पष्टयति ॥ साध्यत्वेन
क्रिया नत्र धात्वर्थनिबंधना सिद्धभावस्तु यस्तस्याः स घञादिनिबंधनः न च घञादिभिः सिद्ध-
त्वेनाभिधाने मानाभावः पाक इत्यत्र को भवति न तु एतद् इत्यादौ घञंतोपस्थानस्यैव मानत्वात् धातूपस्था-
प्यायां न दुसंभवस्योक्तत्वात् लोकः पाक इत्यनापत्तेश्च तस्माद्धात्वर्थान्वये लोकादिशब्देभ्यो
द्वितीयाद्यसत्त्वार्थान्वये प्रथमा प्रातिलिंगता चेति ननु सिद्धत्वे घञादेः शक्तिकल्पे या घञादीनां प्रयो-
गसाधुतामात्रमिति नैयायिकनव्योक्तमपास्तम् न च घञंत धात्वर्थोपस्थाप्यान्वये लोकः पाक इति
भवतीति वाच्यम् घंजतानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवात् तद्धात्वसमानाधिकरणघञादेरेव तथा शक्ति-
कल्पनादित्यादिक एवं च घञ्याभिप्रायेण कृदभिहित इति भाष्यमतो न तद्विरोध इति भावः ४६
ननु कारकाणां भावनान्वयनियमे एवं पाक इत्यत्रापि कर्मषष्ठ्याः स्वारेण भावनायामन्वयत्वं सिध्ये-
त् न देवदत्त इत्याशंकां समाधत्ते ॥ संबोधनांतं कृत्वोर्थाः कारकं प्रथमो वतिः धातुसंबंधाधिका-
रनिष्पन्नमसमस्तनञ् ॥ संबोधनांतस्य क्रियायामन्वयः त्वं ब्रूहि देवदत्तेत्यादौ निघातानुरोधात्
समानवाक्ये निघातयुष्मदस्मदादेशा इत्यनेन वाक्य एव तन्नियमात् उक्तं हि वाक्यपदीये संबोध-

वै० भू० ४ नपदेयस्त्वनन्क्रियायाविशेषणम् धनानिदेवदत्तेनेतिनिराजानोत्रतथासतीति पचतिभवतिदेवदत्तेत्यादौत
स्तत्रभाष्यादौतस्यैकवाक्यतामुक्त्वातस्यादेवनिराजानः तिङ्ङिति सूत्रयतानितिङंतानामप्येकवाक्यतास्वीका
रात् पचतिस्त्राक्याममितिवदतावार्तिककाराणांमते परेत्वचलनपचतीतिङ्विशेषकं वाक्यमितितदभिप्रा
९. यस्यहेलाराजीयादौवैयाकरणभूषणेस्माभिस्तु प्रतिपादितत्वान्नमतेपिभवत्येवेत्यवधेयम् क्तवोर्थाः १
संख्यायाः क्रियाभ्यावृत्तिगणनेकृत्वसुजितिक्रियायोगेनत्साधननोक्ते क्रियायाश्चभ्यावृत्तिः पुनःपुनर्ज
न्मतास्मिन्त्स्त्रियांत्येइतितदर्थात् कारकंकारकइत्याधिकृत्यतेषांव्युत्पादनात् कारकशब्दोहिक्रियापरः
करोतिकर्तृकर्मादिव्यपदेशानितिव्युत्पत्तेः तथाचाग्निमेषप्रादानादिसंज्ञाविधिष्वक्रियार्थकारकश
ब्दानुवृत्त्याक्रियान्वयिनामेवसंज्ञेतिभाष्येस्पष्टम् प्रथमोवर्तिः तेनतत्र्यांक्रियाचेद्दानीरिति विहितः
तत्रयत्तल्यंसाक्रियाचेदित्युक्तत्वात् धातुसंबंधाधिकारे धातुसंबंधेप्रत्ययाइत्यधिकृत्यतेषांविधा
नात् असमस्तनञ् समासायोग्यःप्रसज्यप्रतिषेधीयोनञ्इत्यर्थः उत्तरपदार्थान्वयेपिसमासविकल्प
नपदेसमस्तत्वापद्यथाश्रुतग्रहणायोगात् नचासमस्तनञःक्रियान्वयेमानाभावः नत्वंपचसितत्व
वापचथः चैत्रेणपचतिघटोनजायते इत्यादौ क्रियायामेवनिषेधप्रतीतेः अतएवविद्यमानेपिघटे
तथाप्रयोगः तथाचघटोनास्तीत्यत्राप्यस्तित्वाभावएवबोध्यते नहिघटोनजायतेनास्तीत्यनयोर्धात्वर्थ गुं
भेदमंतरेणास्तिविशेषः तथाचभूतलेनघटइत्यत्राप्यस्तीत्यध्याहार्यम् प्रकारतासंबंधेननञर्थविशेष्य।

जन्य

कबोधेधात्वर्थभावनोपस्थितेर्हेतुत्वस्यक्लृप्तत्वात् पोषोनजर्थनिर्णयेवक्ष्यते ॥ १९ ॥ तथायस्य
चभावेन षष्ठीचेत्समुदितंद्वयम् साधुत्वमष्टकस्यास्यक्रिययैवावधार्यतां ॥ यस्यचभावेनभावलक्ष
णमित्यत्रभावनार्थकभावशब्देनतद्योगेसाधुत्वाख्यानलाभात् षष्ठीचानादरेइतितदर्थिमसूत्रे
पिचकाराद्भावेनेतिग्रायातीत्यर्थः साधुत्वमिति तत्त्वरूपंवक्ष्यते क्रिययैवेति अयंभावः भू
वादिसूत्रादिषुप्रायःक्रियाशब्देनभावनाव्यपदेशात्तत्रतस्यव्यापारस्यसांकेतिकोशाब्दिः फलांश
क्वाचित्कःक्रियतेइतियौगिकःप्रयोगः तथाचसंज्ञाशब्दस्यानपेक्षप्रवृत्तत्वेनबलवत्त्वाद्भावनात्वय
एवसाधुतालभ्यते अतएवसंज्ञाशब्दप्राबल्यादृष्टेतरसूत्रेरग्रन्थपठितमद्भवेगयम् नतद्वेदेनइत्यत्र
पठ्यमानत्वाद्विवानिनवमेनिर्णीतम् किंच फलांशेपिभावनायांविशेषणंकारकाणामिच्छाचितथाश
तानीतिगुणानांचपरार्थत्वादसंबंधःसमत्वात्स्यादितिन्यायेनसर्वेषांकाराणांनामिवभावनायामेवपरस्पर
निरपेक्षा न्वयंतीतिमीमांसकाअपिमन्यन्ते एवंचविशेष्यतयाकारकादिप्रकारकबोधंप्रतिधातुजन्यभावनो
पस्थितिर्हेतुरितिकार्यकारणभावस्यक्लृप्तत्वादत्रापिपक्वःपाचकइत्यादौभावनागुणभूतातत्रापि
क्लृप्तकार्यकारणभावानुरोधात्तस्यामेवान्वयइत्यवसीयतेइत्यादिभूषणेप्रपंचितम् केचित्तुभूतले
घटःदेवदत्तोघटमित्यादावन्वयबोधाकांक्षानिवृत्त्योरदर्शनात्तद्व्यतिरेकेणसाधुत्वलाभइत्या
हुः ॥ १२ ॥ स्वयमप्यपत्तिमाह ॥ यदिपक्षेपिवत्वर्थःकारकंचनजादिषु अन्वेतितस्यजन्यतानतर्हिचेन्न
नहिभिन्नकोभिन्नकान्तरंयातिवृत्तिमर्हतीतिसत्यन्यस्मिन्भिन्नकाइतिन्यायेनापिफलत्यक्त्वाभावनायामेवान्वयंनीति। +

वै॰ भू॰ १०

10

र्थ्योः स्पृहिकल्पना ॥ पर्वतो वह्निमान्धूमात् महानसवत् भूतलेन घटः भूतले घट इत्यादिप्रयोगात् एवमा
दिष्वनुशासनविरोधेपि साधुत्वमन्वयश्चाभ्युपेयते तर्हि चतुर्थ्योः स्पृहिकल्पनापि त्यज्यतामित्यर्थः अनु
शासनानुरोधाद्वैकल्पेप्यर्धजरतीयमयुक्तमिति भावः एवं कर्त्रादौ विहितानामित्यादीनां क्रिययैवान्व
य इत्याह ॥ अविग्रहागतादिस्था यथा यामादिकर्मभिः क्रियासंबध्यते तेन द्वन्द्वस्तत्पुरुषादिषु भाषिता न
विविच्य ग्रहो ग्रहणं यस्याः सा अविग्रहा गुणीभूतेति यावत् तथा च ग्रामं गत इत्यत्र यथोक्तप्रकृत्यर्थो गु-
णीभूतापि क्रिया ग्रामादिकर्मभिः संबध्यते तथा कृतपूर्वी कटमित्यत्रापि गुणीभूता इत्यादि भावित्यर्थः
न च वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वाद्न्वान्तर्गताभावना पदार्थैकदेश इति कथं तत्रान्वय इति वा-
च्यम् नित्यसापेक्षेष्वेकदेशापि देवदत्तस्य गुरुकुलं चैत्रस्य नप्तेत्यादाविवान्वयाभ्युपगमात् एवं भोक्तुं
पाकः भुक्त्वा पाक इत्यत्रापि द्रष्टव्यम् ॥ १९ ॥ अतिप्रसंगमाशंक्य समाधत्ते ॥ क्त्वोर्थ्योः क्त्वा तुमुन्व
त्स्यादिति चेत्सेति हि क्वचित् अतिप्रसंगो नोक्तार्थाभिधानस्य समाश्रयात् भोक्तुं पाकः भुक्त्वा पाक इत्या-
दौ तुमुन् अत्र लौ क्रियायां क्रियार्थायां समानकर्तृकयोः पूर्वकाले इति क्रियावाचकोपपदे क्रिययोः
पूर्वोत्तरकाले विधीयमानापि तुमुनादयो गुणीभूतां तामादाय यथा जायन्ते तथा कृत्वोर्थप्रसृः प-
कः पाक इत्यत्रैकस्य सकृदुद्वा पाको द्वयश्चत्वार इत्यत्र द्वित्रिचतुर्भ्यः सुच् पंचेत्यत्र कृत्वसुच् स्यात् त गं १०
था च सकृत्पाकः द्विः त्रिः चतुः पाक इत्यापत्तिरिति चेदिष्टापत्तिः द्विर्वचनमित्यादिदर्शनात् अति

प्रसंगात्त्वनभिधानान्नेत्याह अतीति नहिवाचिरंतिमपःप्रयुज्यतेइत्याद्यभियुक्तोक्तरीत्यासमाधेयमिर
तिभावः केचित्तुक्रियाभ्याहृतिगणेनइत्यत्रक्रियाग्रहणंव्यर्थम् तस्याप्यभ्याहृतिसंभवेनसामर्थ्यात्त
ल्लाभात् तथाच साध्यमात्रस्वभावक्रियालाभायतदितिवाच्यम् नचपाकइत्यादौतादृशीतिनातिप्र
संगः द्विर्वचनमितिचाद्विःप्रयोगोद्विर्वचनमितिव्युत्पत्त्याद्विर्वचनेचीतिज्ञापकंवाश्रित्योपपादनीय
मित्याहुः ॥ १७ ॥ ननुसिद्धांतेबोधकतारूपाशक्तिःआख्यातशक्तिग्रहवतांबोधादावश्यकीइतिधातो
र्भावनावाच्यानाख्यातस्येतिकथंनिर्णयइत्याशंकांसमाधत्ते ॥ भेद्यभेदकसंबंधोपाधिभेदनिबंधनं
साधुत्वेनतदभावेपिबोधेनेहानिवार्यनाम् भेद्यंविशेष्यंभेदकंविशेषणंतयोर्यःसंबंधस्तस्ययउपाधिभे
दस्तन्निबंधनंसाधुत्वम् अयमर्थः व्याकरणस्मृतिःशब्दसाधुत्वपरा नत्वेवावच्छेदकतयाकल्प्यध
र्मस्यशक्तत्वंवदतांमीमांसकानांपुनःशक्तत्वंसाधुत्वमित्येकमेवेतितद्रीत्याविचारेसाधुत्वनिर्णय
एवशक्तिनिर्णयउच्यते अतिरिक्तशक्तिवादेप्याख्यातानामसाधुताभावनायांस्यादेव तथाच वृत्त
ध्यर्थेतृतीयाप्रयोगवद्धात्वर्थभावनायामाख्यातप्रयोगेयाज्ञेकर्मण्यसाधुशब्दप्रयोगान्नानृतंवदे
दितिनिषेधोल्लंघनप्रयुक्तंप्रायश्चित्तंदर्शनांतरीयव्युत्पत्तिमतांस्यादिति ननुत्वन्मतेनानृतमितिनि
षेधःक्रत्वर्थएवनसिध्येत् आख्यातेनकर्तुःक्रत्वाद्युत्पत्त्यापुरुषार्थतैवस्यात् प्रकरणाद्धिक्रत्वर्थतान
तुश्रुतिविरोधेबाध्यतइतिचेन्नातिङर्थस्याविशेषणमित्यनेनपरिहृतत्वात् नहिगुणभूतःकर्तानिषे

वै॰ भू॰ ११

पंसत्वांगत्वेनगृहीतमलंभावनात् प्रधानेनैतंगृहीतमसमर्थैनिप्रकरणात्क्रत्वर्थनैव अक्तवाक्यात्फलश्रुत
षधर्मः अनुष्ठानेविशेषाभावात् जंजंभमाणोब्रूयान्मयिदक्षक्रतू इतिवाक्योक्तमंत्रविधिवत् इत्यादिभू
षणेप्रपंचितम् नन्वाख्यातस्यभावनायामसाधुत्वेनतत्वद्बोधेन स्यात्साधुत्वज्ञानस्यशाब्दहेतुत्वादित्य वै॰ प॰
तआह बोधइति असाधुत्वेपिसाधुत्वभ्रमाद्बोधोस्तुनामअपभ्रंशवत्साधुत्वंतुस्यादेवेतिभावः वस्तुतः
साधुत्वज्ञानंनहेतुःतद्व्यतिरेकनिर्णयोपिनप्रतिबंधकइत्यसाधुत्वानुमानेनेत्यत्रवक्ष्यामः ॥ रंगोजिभट्ट
पुत्रेणकौण्डभट्टेननिर्मिते भूषणसारेस्मिन्धात्वाख्यातार्थनिर्णयः ॥ इतिश्रीवैयाकरणभूषणसा
रेधात्वर्थाख्यातसामान्यार्थयोर्निरूपणंसमाप्तम् ॥ प्रत्येकंदशलकाराणामर्थंनिरूपयति ॥ वर्त
मानेपरोक्षेश्वोभाविन्यर्थेभविष्यति विध्यादौप्रार्थनादौचक्रमाज्ज्ञेयालडादयः लडादयष्टितःषट्क्र
मेणार्थेष्विष्टाः तथाहि वर्तमानेलट् वर्तमानेलडितिसूत्रात्प्रारब्धापरिसमाप्तत्वंभूतभविष्यद्भि
न्नत्वंवावर्तमानत्वं पचतीत्यादावधिश्रयणाद्यधःश्रयणांतेमध्येतदस्तीतिभवतिलट्प्रयोगः आ
स्मास्ति पर्वताःसंतीत्यादौतात्कालिकानांराज्ञांक्रियाणामानंत्यत्वाद्व्यक्तिविशिष्टप्रत्ययादिकमादायव
र्तमानत्वमूह्यम् उक्तंचभाष्येइहभूतभविष्यद्वर्तमानानां राज्ञांक्रियाणांक्षितिरधिकरणमिति पर्वतोभि
धीयतेसर्वस्मात्कालान्नविकल्पते पर्वतादिस्थितिस्तस्मात्परद्रूपेणाभिधीयते इतिवाक्यपदीयेच एवंचतम गं॰
आसीत् तुच्छेनाभ्वपिहितंयदासीत् अहमेकःप्रथममासंवर्तामिचभविष्यामिचेत्यादिश्रुतयोपि ११

योज्याः तत्र वर्तमानत्वादि लडादिभिर्द्योत्यते क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणया लडादेः
स्तात्पर्यग्राहकत्वेनोपयोगात् अन्वयव्यतिरेकाभ्यां तद्रूपं लडादिवाच्यमेव अन्यथा प्रत्ययानां वाचक
त्वविलोपापत्तिरित्यपि पक्षान्तरम् लिडर्थमाह परोक्ष इति परोक्षे लिडिति सूत्रात् कालस्तावदद्य
तनानद्यतनभेदेन द्विविधः द्विविधोपि भूतभविष्यद्रूपः तत्रानद्यतने भूते परोक्षे लिडित्यर्थः तेनान
द्यतने भूते नद्यतने भाविष्यति भूते च परोक्षे च लिट् प्रयोगः परोक्षत्वं च साक्षात्कारो मीत्येतादृशाविषय
ताश्रालिङ्गानाविषयत्वम् न च क्रियानामेयमत्यन्तापरिदृष्टपूर्वापरीभूतावयवा न शक्या पिण्डीभू
तानिदर्शयितुमिति भाष्यात्तस्या अतीन्द्रियत्वेन परोक्षेऽन्यव्यावर्तकत्वमिति शंक्यं पिण्डीभूतायानि
दर्शयितुम् अशक्यत्वेप्यवयवशः साक्षात्कारो मीति विषयत्वसंभवात् अन्यथा पचपचसगोथावती
त्यत्र न स्यात् दर्शनकर्मतान स्यादिति प्रतिभाति व्यापाराविष्टानां क्रियाजन्यफलसाधनानामेवात्र पारोक्ष्यं
विवक्षितमतो नोक्तदोषः अयं पपाचेत्यादौ तथाव्यापाराविष्टानामित्यपि वदन्ति कथं तर्हि व्याते
नेकिरणावलीमुदयन इति स्वक्रियायाः स्वप्रत्यक्षत्वादि चेत् असंगतमेव व्यासंगादिना स्वव्यापार
स्य परोक्षत्वोपपादनेपि अनद्यतनातीतत्वयोरभावेन तदर्थ कालिड संभवात् लुडर्थमाह श्वोभावि
तेति अनद्यतने भाविनीत्यर्थः अनद्यतने लुडिति सूत्रात् यथा श्वो भवितेत्यादौ ॥ लृडर्थमाह ॥
भविष्यतीति भविष्यत्सामान्य इत्यर्थः लृट् शेषे चेति सूत्रात् यथा वः सो भविष्यतीत्यादौ तत्र च वर्तमा

वै॰ भू॰ १२ नुप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम् लेटोऽर्थमाह विध्यादाविति लिङर्थे लेटिति सूत्रात् लिङ
र्थेष्वेव विध्यादिष्विति वक्ष्यते लोडर्थमाह प्रार्थनादाविति आदिना विध्यादयो ग्राह्याः आशिषि लि
ङ्लोटौ लोट्चेति सूत्राभ्यां तथा तथावगमात् यथा भवन्तोऽपि शिवप्रसादं दर्श्यादौ एतयोरर्थौ लिङर्थप्रवृत्तेर
याणां समानार्थत्वादिति तन्निर्णये नैव निर्णयः ॥ १ ॥ लङादिक्रमेण ङितामर्थमाह ॥ शोभनस्तेऽम
णादौ च भूतमात्रे लङादयः सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः ॥ लङर्थमाह शोभनस्तनद्य
तीत अनद्यतन इत्यर्थः अनद्यतने लङ् इति सूत्रात् यथास्य पुत्रोऽभवदित्यादि । लिङर्थमाह । प्रेरणादा
विति विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रात् विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्र
वर्तनम् निमन्त्रणं नियोगकरणं आवश्यके प्रेरणमित्यर्थः आमन्त्रणं कामचारानुज्ञा अधीष्टं सत्कारपूर्व
को व्यापारः एतच्चतुष्टयानुगतं प्रवर्तनात्वेन वाच्यता लाघवात् उक्तं च अस्ति प्रवर्तनारूपमनुस्यूतं च
तुर्ष्वपि तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा विध्यादी
नामुपादानं चतुर्णामादितः कृतमिति प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं न चेष्टसा
धनत्वस्यापीति तदेवार्थोऽस्तु यद्यप्येतत्कृतिसाध्यत्वस्यापि तज्ज्ञानस्यापि प्रवर्तकत्वात् तथापि यागा
दौ सर्वत्र तल्लौकिकप्रत्यक्षं वा गम्यते इत्यन्यलभ्यत्वात् तत्र वाक्यं बलवदनिष्टाननुबन्धित्वज्ञानं च न हेतुः १ ग्रं॰
द्वेषाभावेनान्यथासिद्धत्वात् आकस्मिककामुकस्य नरकसाधनता ज्ञानदशायामप्युत्कटेच्छया द्वेषा १२

12.

भावदशायां प्रवृत्तेर्व्यभिचाराच्च तस्मादिष्टसाधनत्वमेव प्रवर्तना[त्व]म् उक्तं च मण्डनमिश्रैः पुंसां नेष्टाभ्यु-
पायत्वात्क्रियास्वन्यः प्रवर्तकः प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनामिति प्रपञ्चितं चैतद्वैयाकरणभूषणे
आदिना हेतुहेतुमतोर्लिङ् आशिषि लिङ्लोटाविति सूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते यो ब्राह्मणा-
यावगुरेत्तं शतेन यातनयादिति यथा लङर्थमाह भूतमात्रे इति भूतसामान्ये इत्यर्थः भूत इत्यधिकृ-
त्य लङिति सूत्रात् अत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वं तच्च क्रियायां निर्धार्यमिति विद्यमानेऽपि
घटे घटोऽभूदिति प्रयोगः विद्यमानध्वंसप्रतियोगी यो घटाभिन्नाश्रयकउत्पत्त्याद्यनुकूलो व्यापार इति बो-
धः अयमत्र संग्रहः कालो द्विविधः अद्यतनोऽनद्यतनश्च आद्यो द्विविधः भूतभविष्यद्वर्तमानभेदात्
अन्त्यो द्विविधः भूतो भविष्यंश्च तत्र वर्तमानत्वे लट् भूतत्वमात्रे लुङ् भविष्यन्मात्रे लृट् हेतुहेतुम-
द्भावाद्यधिकार्थविवक्षायामनयोर्लृङ् अनद्यतने भूतत्वेन विवक्षिते लङ् तत्रैव परोक्षत्वविवक्षायां
लिट् तादृशे भविष्यति लुट् इति द्रष्टव्यः लृङर्थमाह सत्यामिति क्रियाया अतिपत्तिरनिष्पत्तिस्तस्यां
गम्यमानायां भूते भाविनि हेतुहेतुमद्भावे सति लृङित्यर्थः लिङ्निमित्ते लृङ् क्रियातिपत्ताविति सूत्रात्
लिङो निमित्ते हेतुहेतुमद्भावादि यथा सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत् वह्निश्चेत्प्राज्वालि-
ष्यत् ओदनमपक्ष्यत् इत्यादौ अत्र वह्न्यभिन्नाश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयुक्तौदनाभिन्ना-
श्रयकविक्लित्त्यनुकूलव्यापाराभाव इति शाब्दबोध इति रीत्या द्रष्टव्यम् अयं चार्थनिर्देश उपलक्षणम् अग्रे

स्तुतएवः

वै. तेष्वपिवृक्षशोविधानदर्शनात् प्रसिद्धत्वाद्देशेवार्थेषुशक्तिरन्यत्रलक्षणेतिमतांतरंरीत्याचोक्तं एतेषांक्रम
भू. कृ. नियामकसूत्रात्रबंधक्रमएव पंचमलकारइत्यनेनमीमांसकैर्लेड्व्यवह्रियतेइतिदिक् ॥ इतिश्रीवैयाक
सा. रणभूषणसारेलकारविशेषार्थनिरूपणम् ॥ २ ॥ सुबर्थमाह ॥ आश्रयोवधिरुद्देश्यःसंबंधःशक्तिरे
13. ववा यथायथंविभक्त्यर्थाःसुपांकर्मेतिभाष्यतः ॥ द्वितीयातृतीयासप्तमीनामाश्रयोर्थः तथाहि कर्म
णिद्वितीयेतिसूत्रकर्तुरीप्सिततमंकर्मक्रियाजन्यफलाश्रयइत्यर्थः क्रियाजन्यफलवत्त्वेनकर्मणएवकर्तु
रीप्सिततमत्वात् तथायुक्तंचानीप्सितमित्यादिसंग्रहात्चैवमेवयुक्तम् ईप्सितानीप्सितत्वयोःशा
ब्दबोधेमानाभावेनसंज्ञायामेवतदुपयोगोनतुवाच्यकोटौतत्प्रवेशः तथाच क्रियायाःफलस्यचधा
तुनैवलाभादनन्यलभ्यआश्रयएवार्थः तस्यचाधारशक्तिरूपमवच्छेदकम् गेहंप्रविशतीत्यत्रवि
क्लित्याश्रयत्वात्कर्मता वृक्षंत्यजतीत्यत्रोत्पत्त्याश्रयत्वात् उत्पत्तेर्धात्वर्थत्वात् जानातीत्यत्रावरणभं
गरूपज्ञाधात्वर्थफलाश्रयत्वात् अतीतानागतादिपरोक्षस्थलेपिज्ञानजन्यस्यतस्यावश्यकत्वात्
अन्यथापूर्वंजानामीत्यनापत्तेः अतीतादेराश्रयताचविषयतयाज्ञानाश्रयतयानैयायिकानामिवा
सत्कार्यवादसिद्धांतात्सिद्धोपपद्यतेइति उक्तंच तिरोभावाभ्युपगमेभावानांसैवनास्तिता लब्धक्रमेतिरो
भावेनस्त्यतीतिप्रतीयते ननुचैत्रोग्रामंगच्छतीत्यत्रग्रामस्येवचैत्रस्यापिक्रियाजन्यग्रामसंयोगरूपफ गं.
लाश्रयत्वात्कर्मत्वापत्तौ चैत्रःचैत्रंगच्छतीत्यापत्तिः प्रयागतःकाशींगच्छति चैत्रःप्रयागंगच्छती२ २३

त्यागमित्रिश्च क्रियाजन्यसंयोगस्य काशीमिव विभागस्य प्रयागेपि सत्त्वादिति चेन्न ग्रामस्येव चैत्रस्या-
पि फलाश्रयत्वेपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन चैत्रश्चैत्रमिति प्रयोगासंभवात् द्वितीयोत्प-
त्तौ संज्ञाया एव नियामकत्वात् अन्यथा ग्रामं गमयति वृक्षसंयोगफलमित्यत्रेव पाचयति वृक्षसेनेत्यत्रापि फ-
लपदात् द्वितीयापत्तेः शाब्दबोधस्त्वैत्रश्चैत्रमित्यत्र स्यादिति चेन्न तथाव्युत्पन्नानामिष्टापत्तेः उच्यतां वा
प्रकारतासंबंधेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणत्वोपस्थितिर्हेतुरि-
ति कार्यकारणभावान्तरम् प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः प्रयागस्य कर्मत्वं तु संभा- ना॰
वितमपि न समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्योक्तप्रायत्वात् नै-
यायिकास्तु आघटोघवारणाय परसमवेतत्वं द्वितीयवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं द्वि-
तीयावाच्यमुपाददते परसमवेतत्वं धात्वर्थक्रियायामन्वेति तथैव कार्यकारणभावान्तरकल्पनात्
परत्वमपि द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते तथा च चैत्रस्तण्डुलं पचतीत्यादौ तण्डुलान्यसमवे-
तव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात् तण्डुलानां कर्मता शाब्दबोधस्तु तण्डुलसमवेत
धात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डुलान्यसमवेतक्रियाजनककृतिमांश्चैत्र इत्याकारः तन्न रोचया-
महे परसमवेतत्वादेर्गौरवेणावाच्यत्वात् अतिप्रसंगः किं द्वितीयायाः शाब्दबोधस्य वा लाघः तावद्धा-
त्वकथनेपि तद्वदस्यात् गमयति वृक्षसंयोगफलमिति वत् पाचयति वृक्षसंयोगमप्यन्त्यापत्तेः तण्डुलं पचति

वै.
भू.
१४

14

वैवद्इतिवर्त्तनंतुल्यंपच्यतेस्वयमेवेत्यापत्तेश्च विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूपधात्वर्थाश्रय
त्वात् यदूबोधातिप्रसंगोप्युक्तरीत्यैवनिरस्तः परसमवेतत्वस्यशाक्यत्वेपिपरत्वस्यपरसमवेतत्वस्यच
ष्टान्वयलाभायानेकशःकार्यकारणभावाभ्युपगमेगौरवंतत्वादितिस्पष्टंभूषणे एतच्चसप्तविधं निर्वर्त्यं
चविकार्यंचप्राप्यंचेतित्रिधामतम् तच्चेप्सिततमंकर्मचतुर्धान्यत्तुकल्पितं औदासीन्येनयत्प्राप्यंयच्च
कर्तुरनीप्सितम् संज्ञान्तरैरनाख्यातंयद्यच्चाप्यन्यपूर्वकम् इतिवाक्यपदीयात् यदसज्जायतेसद्वाजन्म
नायत्प्रकाश्यते तन्निर्वर्त्यंविकार्यंतद्द्वेधाकर्मव्यवस्थितम् प्रकृत्युच्छेदसंभूतंकिंचित्काष्ठादिभस्मवत्
किंचिद्गुणान्तरोत्पत्त्यासुवर्णादिविकारवत् क्रियाकृतविशेषाणांसिद्धिर्यत्रनगम्यते दर्शनादनुमानाद्वा
तत्प्राप्यमितिकथ्यते इतिवचनैश्चोक्तम् घटंकरोतीत्याद्यंकाष्ठंभस्मकरोतीतिसुवर्णंकुण्डलंकरोतीति
चद्वितीयं घटंपश्यतीतितृतीयं तृणंस्पृशतीत्युदासीने विषंभुङ्क्तेइतिद्वेष्यम् गांदोग्धीतिसंज्ञान्तरैर
नाख्यातं क्रूरमभिक्रुध्यतीत्यन्यपूर्वकम् कर्तृतृतीयाप्रथमयोरर्थः तथाहि स्वतन्त्रःकर्ता स्वातन्त्र्यंच
धात्वर्थव्यापाराश्रयत्वम् धातुनोक्तक्रियेनित्यंकारकेकर्तृतेष्यतइतिवाक्यपदीयात् अतएवयदाय
दीयोव्यापारोधातुनाभिधीयतेतदासकर्तेति स्थालीपचति अग्निःपचति एधाःपचन्ति तण्डुलाःपच्यन्ते
स्वयमेवेत्यादिसंगच्छते तत्वेवंकर्मकर्तृत्वव्यपदेशाच्चेतिसूत्रेमनोमयःप्राणशरीरइतिवाक्यस्यमनो
मयस्यजीवत्वेवाक्यशेषेतस्यएतमितःप्रेत्याभिसंभवितास्मीतिप्राप्तिकर्मकर्तृत्वव्यपदेशोविरुद्धइति

गं.
१४

भगवताव्यासेननिर्णीतंकथंसंगच्छताम् उच्यतेजीवस्यैवज्ञेयत्वेप्राप्तेकर्मत्वमपिवाच्यम् कर्तृत्वं
चतस्यात्मनेनोक्तम् नचैकस्यैकदासंज्ञाद्वयंकथंकर्तृसंज्ञयाकर्मसंज्ञायाबाधात् तथाचैतमिति
द्वितीयानस्यात् कर्मकर्तृतायांचयगात्मनेपदादिरितिशाब्दविरोधश्चाभवतिसभेदहेतुः एवंचव्यापा
रांशस्यधात्वलभ्यत्वादाश्रयमात्रंतृतीयार्थः कारकचक्रप्रयोक्तृत्वंकृत्याश्रयत्वेवादरणःकरोतीत्य
त्राव्याप्तम् अयंचत्रिविधःशुद्धःप्रयोजकोहेतुः कर्मकर्ताच यथाहरिःसेव्यते कार्यतेहरिणा ग
मयतिकृष्णंगोकुलम् गत्यभिन्नाश्रयकोहरिकर्मकसेवनानुकूलोव्यापारः हर्यभिन्नाश्रयकउत्पा
दनानुकूलोव्यापारः गोकुलकर्मकगमनानुकूलकृष्णाश्रयकव्यापारानुकूलोव्यापारइतिशाब्द
बोधः करणतृतीयायास्तुआश्रयव्यापारौवाच्यौ तथाहि साधकतमंकरणं तमबर्थःप्रकर्षः स
चाव्यवधानेनफलजनकव्यापारवत्त्वात्तादृशव्यापारवत्कारणंचकरणम् उक्तंचवाक्यपदीये १
क्रियायाःपरिनिष्पत्तिर्यद्व्यापारादनन्तरम् विवक्ष्यतेयदायत्रकरणंतत्तदास्मृतम् वस्तुतस्तदनिर्दे
श्यंनहिवस्तुव्यवस्थितम् स्थाल्यापच्यतइत्येषाविवक्षादृश्यतेयतइति विवक्ष्यतेइत्यनेनसकृदने
केषांतत्संभवाद्द्वितीयासमस्यादेरवकाशंसूचयति नचैवंकर्ताशाब्दार्थवत्त्वादित्युत्तरमीमांसाधि
करणेशक्तिविपर्ययादितिसूत्रेणांतःकरणस्यकर्तृत्वेकरणशक्तिविपर्ययापत्तिरुक्तानयज्ञेनेति
वाच्यम् तदेनेसंप्राणानांविज्ञानेनविज्ञानमादायेतिश्रुत्यंतरेकरणतयाल्हाभस्यकर्तृतांप्रकल्प्यश

क्रियाविपर्ययापत्तिर्निष्क्रमाणकल्प्यैनेत्यभिप्रायात् वस्तुतस्तु भक्ष्यमात्रमेतदिति यथाच तत्रोभय
थेत्यधिकरणेभाष्यएवस्पष्टमित्यादिप्रपंचितंभूषणे सप्तम्याश्रयाश्रयोर्थः सप्तम्यधिकरणेचेत्यधि
करणेसप्तमी तत्राधारोधिकरणमितिसूत्रादाधारः तत्राश्रयत्वं तत्राश्रयांशःशाक्यस्तत्त्वमवच्छेद
कंनचाश्रयत्वमात्रेणकर्मकर्तृकरणानामाधारसंज्ञास्यात् स्यादेव यदितामिरस्यानबाधःस्यात्
कारकेइत्यधिकृतविहितसप्तम्याक्रियाश्रयइत्येवयथापितात्पर्यम् तथा पक्वकर्तृकर्मद्वारानदा
श्रयत्वमस्त्येवस्थाल्यादेर्भूतलकटादेस्तुतिस्थाल्यांपचतिभूतलेवसतिकटेशेतइत्याद्युपपद्यते उक्तं
चवाक्यपदीये कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् उपकुर्वत्क्रियासिद्धौशास्त्रेधिकरणंस्मृतं
तच्चत्रिविधं औपश्लेषिकं वैषयिकमभिव्यापकंच कटेशेते गुरौवसति मोक्षेइच्छास्ति तिलेषुतै
लमिति एतच्चसंहितायामितिसूत्रेभाष्येस्पष्टम् अवधिःपंचम्यर्थः अपादानेपंचमी तच्चध्रुवमपाये
पादानमितिसूत्राद्पायोविश्लेषःतज्जनकक्रियातत्रावधिभूतमपादानमित्यर्थकादवधिभूतमितिभावः
उक्तंचवाक्यपदीये अपायेयदुदासीनंचलंवायदिवाचलम् ध्रुवमेवातदावेशात्तदपादानमुच्यते पततो
ध्रुवएवाश्वोयस्मादश्वात्पतत्यसौ तस्याप्यश्वस्यपतनेकुड्यादिध्रुवमुच्यते उभावप्यध्रुवौमेषावित्युभ
यकर्मजे विभागेप्रविभक्तेनक्रियेतत्रव्यवस्थिते मेषांतरक्रियापेक्षमवधित्वंपृथक्पृथक् मेषयोः
स्वक्रियापेक्षंकर्तृत्वंचपृथक्पृथगिति ॥ अस्यार्थः अपायेविश्लेषहेतुक्रियायामुदासीनमनाश्रयः

अनद्यत्वेषात्तत्क्रियानाश्रयत्वात् एवंचविश्लेषहेतुक्रियानाश्रयत्वेसतिविश्लेषाश्रयत्वंफलितम्
वृक्षात्पर्णंपततीत्यत्र पर्णस्यतच्छ्रारणाय सत्यपितथात्वतोऽश्वात्पततीत्यत्राश्वस्यक्रियाश्रयत्वाद्विश्लेषहे
तुत्वितिजश्वात्पततोऽश्वात्पततीत्यत्राश्वस्यविश्लेषजनकक्रियाश्रयत्वेपितत्रविरुद्धमित्याह यस्मादश्वा
दिति तद्विश्लेषहेतुक्रियानाश्रयत्वेसतीतिविशेषणीयमितिभावः एवमश्वानिष्ठक्रियानाश्रयत्वा
त्तज्जन्यादेरप्यध्रुवत्वमित्याह तस्यापीति उभयकर्मजविभागस्थलेविभागस्यैक्यात्तद्विश्लेषजनकक्रि
यानाश्रयत्वाभावात् परस्परान्मेषावपसरतइतितत्स्यादित्याशंक्यसमाधत्ते उभावपीति मेषांतरक्रि
यायथानिष्कलमेषादपसरद्द्वितीयमेषस्थलेनिष्कलमेषस्यापसरन्मेषमादायाध्रुवत्वं तथात्रापिवि
भागैक्येपिक्रियाभेदेकाक्रियामादायपरस्परध्रुवत्वमिति तथाचविश्लेषाश्रयत्वेसतितज्जनकतत्क्रि
यानाश्रयत्वंतत्क्रियायामपादानत्वंवाच्यम् क्रियाचात्रधात्वर्थोनतुस्पन्दः तेनवृक्षत्कर्मजविभाग
वतिवस्त्रेवृक्षाद्वस्त्रंपततीतिसंगच्छतेवस्तुतोनेतत्पंचम्यावाच्यम् किंत्ववधेर्लक्षणमात्रं द्वितीयार्थो
क्तरीत्याप्रयोगातिप्रसंगस्यासंभवेनवाच्यकोटौप्रवेशस्यगौरवेणासंभवादितितुप्रतिभाति नचैवम
पिवृक्षात्स्पन्दतइति स्यादितिशंक्यम् आसनाच्चलितः राज्याच्चलितइतिवदिष्टत्वात् एतेनपंचमी
जन्यापादानत्वबोधेसकर्मकधातुजन्योपस्थितेर्हेतुत्वमितिसमाधानाभासोऽप्यपास्तः नचैवमपिवृ
क्षात्त्यजतीतिदुर्वारम् कर्मसंज्ञयाह्यपादानसंज्ञायाबाधेनपंचम्यभावात् ग्रामात्त्यजतीतिप्रयोगेयदि

दि॰

वै॰ भू॰ १६ बाधा भावोऽनुभवसिद्धस्तर्हि पंचमी जन्यापादानत्वबोधेऽन्यथा भिन्नधातजन्यवृद्धेर्हेतुत्वं वाच्यम् बलाह
काद्विद्योतते इत्यादौ निःसृत्येत्यध्याहार्यम् इयं सान्निध्ययोगस्य बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम्
पृथक्त्वेनेति पंचमी वा इदं च निर्दिष्टविषये किंचिदुपात्तविषयं तथा अपेक्षितक्रियं चेति त्रिधापादान निर्दिष्टपते॰
16 मुच्यते इति वाक्यपदीयात्त्रिविधम् यत्र साक्षाद्धातुना गतिस्तन्निर्दिष्टविषयम् यथा अश्वात्पतति यत्र
धात्वंतरार्थांगं स्वार्थं धातुराह तदुपात्तविषयं यथा बलाहकाद्विद्योतते निःसरणांगे विद्योतने धातुर्व इति॰
र्तते अपेक्षिता क्रिया यत्र तदंत्यं यथा कुतो भवान् पाटलिपुत्रात् अत्रागमनमर्थमध्याहृत्यान्वयः कार्यः
उद्देश्यपञ्चत्वर्थ्यर्थः तथाहि संप्रदाने चतुर्थी तच्च कर्मणा यमभिप्रैति स संप्रदानमिति सूत्रात्कर्मणा क
रणभूतेन यमभिप्रैति ईप्सति तत्कारकं संप्रदानमित्यर्थादुद्देश्यः इदमेव शेषत्वं तदुद्देश्यकत्वाविष
नि॰ यत्वं च शेषत्वमित्येव पूर्वतनैर्ज्ञापितं अत एव प्रासंजयन्मैत्रावरुणाय दण्डप्रदानमित्यधिकरणे सोमे मैत्रा क्रीते॰
वरुणाय दण्डं प्रयच्छतीति विहिते दण्डदाने चतुर्थ्युक्तत्यागार्थकर्मेति तत्र निर्णीतं रजकाय वस्त्रं ददाती
त्यादिवारणाय उपाध्यायः शिष्याय चपेटां ददातीति भाष्योदाहरणादिष्टमेव हविः कार्त्स्न्येन सम्यक् प्रदीयते
सं॰ यस्मै तत्संप्रधानमित्यन्वर्थसंज्ञया स्वत्वनिवृत्तिपर्यंतमर्थं वर्णयंतो रजकस्य वस्त्रमित्येवाहुः इदं च अ
निराकरणात्कर्तुरुपासनां कर्मणोऽपि तं प्रेरणानुमतिभ्यां च लभते संप्रदानतामिति वाक्यपदीयात्त्रि गं॰
विधं सूर्यायार्घ्यं ददातीत्याद्यं नात्र सूर्यः प्रार्थयते नानुमन्यते न निराकरोति प्रेरकं विप्राय गां ददाति १६

अत्र मैत्र उपाध्यायाय गां ददाति अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः विभक्तीनां धर्मिवाचकत्वा
त् धर्ममात्रवाचकत्वे कर्मणि द्वितीयेति सूत्रस्वारस्यभंगापत्तेः कर्मार्थकत्वन्नाडिनादौ तथादर्शनाच्च द्वितीया
द्यर्थकबहुव्रीहौ प्राप्तोदक इत्यादौ धर्मिवाचकत्वालाभाच्च सुपां कर्मादयोप्यर्थाः संख्या चैव तथा ति
ङामिति भाष्याच्चेति दिक् आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता किन्त्वाश्रयत्वमात्रं वाच्यं
तदेव च तादात्म्येनावच्छेदकं करणं तृतीयायाः स्वव्यापारेणेति पंचम्याः विभागमात्रं चतुर्थ्या उद्देश्यत्वमात्र

मत एवाकृत्याधिकरणमपि न कृत्स्ने इत्यभिप्रेत्याह शक्तिरेवैवेति षष्ठ्यामपीति शेषः शेषषष्ठीति सू
त्रे तस्याः संबंधमात्रं वाच्यम् कारकषष्ठ्यास्तु शक्तिरेवेत्यर्थः सप्तमीपंचम्यौ कारकमध्ये इति सूत्रे श
क्तिः कारकाणामिति पदस्य भाष्ये दर्शनात् एवं च देवदत्तस्य गौर्ब्राह्मणाय गेहाङ्गङ्गायां हस्तेन मया दीय
ते इत्यत्र देवदत्तसंबंधिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिरूपितविभागज
नको गंगाधिकरणो हस्तकरणको मन्निष्ठो व्यापार इति बोधः यथायथमुक्तप्रकारेणात्र मनस्रपदर्शि
यत्वं जानातीत्यादौ द्वितीयाया विषयतायां लक्षणेति बज्राउलेवदतो नैयायिकादीन्प्रत्याह सुपां
कर्मेत्यादि अयंभावः सुपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङाम् प्रसिद्धो नियमस्तत्रानियमः प्र
कृतेष्वचेति वार्त्तिकतन्त्राभाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः तथा हि स्वौजसमौट् कर्मणि
द्वितीयाद्येकयोर्द्विवचनैकवचने इत्यादेः लभ्यते मम ङित्वाद्येकवचनेत्यादेरेकवाक्यतया कर्मादे

वै॰ भू॰ १७ 17

त्तसंख्याया स्ववाच्यता लभ्यते तथा तान्नियमश्च द्विविधो लभ्यते द्वितीया कर्मण्येव तृतीया करण एवे
त्येवमादिरर्थनियमः कर्मणो द्वितीयैव करणात्तृतीयैवेत्येवं शब्दनियमश्चोभयथापि सिद्धं नियममवि
रुद्धे लक्षणादिकमसाफल्यप्रयोजकमिति याज्ञेकर्मणाना ते वटेटीतिनिषेधविषयो भवत्येवेति स्वेच्छा
या लक्षणापि विभक्त्यार्थप्रयोजिकैव अत एव विभक्तौ न लक्षणेत्यादि नैयायिकवृद्धानां व्यवहार इति दि
क् ४४ ॥ इति श्रीवैयाकरणभूषणसारे सुबर्थनिर्णयः ३ ॥ नामार्थमाह ॥ एकं द्विकं त्रिकं चाथ
चतुष्कं पंचकं तथा नामार्थ इति सर्वेमी पक्षाः शास्त्रे निरूपिताः ॥ एकं जातिः लाघवेन तस्या एव वा
च्यतौचित्यात् अनेकव्यक्तीनां वाच्यत्वे गौरवात् न च व्यक्तीनामपि प्रत्येकमेकत्वाद्धि निगमनाविर
हः एवं ह्येकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यंतरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवे
जात्यात्मसहाश्रयत्वमेव संसर्ग इति लाघवम् किं चैवं विशिष्टवाच्यत्वमपेत्य नागृहीतविशेषणन्या
याज्जातिरेव वाच्येति फलं व्यक्तिबोधस्तु लक्षणया एवं च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते इति दिक्
यद्वा केवलव्यक्तिरेवैकशब्दार्थः केवलव्यक्तिपक्ष एवाग्रहास्यैकशेषस्य चारंभेण तस्यापि शास्त्रसिद्ध
त्वात् फलं चैतत् व्यवहारे व्यक्तावेव तद्ग्रहणात् संबंधितावच्छेदकस्य जातेरैक्याद्व्यक्तिरप्येकैवेति
न गौरवमपि न चैवं घटत्वमपि वाच्यं स्याच्छक्यतावच्छेदकत्वात् तथा च नागृहीतविशेषणन्यायात्तदेव ग्रं॰
वाच्यमस्तीति शंक्यम् अकारणत्वेपि कारणतावच्छेदकवद्दलत्वेपि लक्ष्यतावच्छेदकत्ववत्तथापि संभ १७

वात् उक्तं च आनंत्येप्यहिभावानामेकं कृत्वोपलक्षणम् शब्दः सुकरसंबंधो न च व्यभिचरिष्यतीति ॥
वस्तुतो नस्याकृतिपदार्थस्य द्रव्यं नु पदार्थ इति भाष्याद्विशिष्टं वाच्यं एकमित्यस्य चायमभिप्रायः शक्ति
ज्ञाने विषयतयावच्छेदिका जातिरेव तथा च घटत्वविशिष्टबोधे घटत्वांशेऽन्यप्रकारकघटत्वशक्तिज्ञान
त्वेन हेतुत्वेनैककार्यकारणभावइत्यादि प्रपंचितं भूषणे तदेतदभिप्रेत्याह द्विकमिति जातिव्यक्ती इत्य
र्थः त्रिकमिति जातिव्यक्तिलिंगानीत्यर्थः सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वं आधिक्यं पुंस्त्वं
अपचयः स्त्रीत्वं तत्तत्त्वादिर्जातिस्तद्वाच्यं च तमेव विलक्षणधर्ममादाय तटादिशब्दाभिधेयत्वे केषांचिदनेकलिं
गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात् एवं च पदार्थपदे पुंस्त्वमेव व्यक्तिपदे स्त्रीत्व
मेव वस्तुपदे नपुंसकत्वमेवेति सर्वत्रैवाथ पदार्थः इयं व्यक्तिः इदं वस्त्विति व्यवहारः तटस्तटी तटमि
ति चोपपद्यते तच्च लिंगमर्थपरिच्छेदकत्वेनान्वेतीति पश्वादिशब्दोक्तं पशुः स्त्रियां नास्तीति पशुनेत्यादि
विधिर्नच्छागवादीनं गत्वेन प्रयोजयतीति विभावनीयम् न च व्यक्त्यादिशब्दोक्तलिंगस्येव पश्वादिशब्दोक्त
स्यापि साधारण्येऽर्थकत्वम् व्यक्तिशब्दस्य नित्यस्त्रीलिंगत्वेन तथा संभवेऽपि पशुशब्दस्य नित्यपुंलिंगत्वे प्र
माणाभावात् पश्वानयावेग्रहा चरते पश्वेनलभ्योयथा गवेइत्यादि वेदे दर्शनाच्च मीमांसायां च तदर्थे पशु
नायजेतेत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च वस्तु
तस्तु विशेषविध्यभावे अप्रत्ययानां नपुंसकत्वस्य व्याकरणोनिर्णीतत्वाच्छेदभाष्येपि जसादिश्च्छेदस्तिवावचन

वै. भू. १८

मितिनाभावाभावइत्युक्तेः पशुशब्दस्यानित्यपुंस्त्वनिर्णयात् प्रकृतेपस्यैवाव्यक्तिशब्दस्येवपश्वापशुनेत्यप्रयो
गात् यत्रापिपशुशब्दमात्रमनिर्णीतमस्तित्वात् तत्रापिच्छागोवामंत्रवर्णादितित्यायेनैवनिर्णयः मंत्रवर्णोहि
छागस्यवपायामेदसइतिश्रूयते तत्रछागस्येतिच्छागणामसंभावितमितिभवति ततःपुंस्त्वनिर्णयइतिविस्त
रेणाप्रपंचितंभूषणे चतुष्कसंख्यासहितंत्रिकमित्यर्थः पंचकंकारकसहितंचतुष्कमित्यर्थः नन्वन्वयव्य
तिरेकाभ्यांप्रत्ययस्यैवतद्वाच्यम् ततएवलिंगादीनामुपस्थितौप्रकृतिवाच्यत्वेमानाभावाच्चेतिचेत्सत्यम्
प्रत्ययवर्जितेदधिपश्यादौप्रत्ययमजानतोपिबोधात्प्रकृतेरेववाचकत्वंकल्पते लिंगानुशासनस्यप्रकृते
पत्तेषु रेवदर्शनाच्चेति अतएवैकमुक्तनिर्बंधः प्रत्ययस्यैववाचकतायायज्ञात्वात् द्योतिकावाचिकावास्युर्द्वित्वा
दीनांविभक्तयइतिवाक्यपदीयेपिपक्षद्वयस्यव्युत्पादनात् शास्त्रइतिबहुस्थलेव्युत्पादनेनसंजायतेप्रा
धान्येनसद्रूपसत्त्वादौव्यक्तम् ॥ २९ ॥ शब्दत्वावच्छब्दबोधेभासते ॥ नसोस्तिप्रत्ययोलोकेयःशब्दानुग
माहते अनुविद्धमिवज्ञानंसर्वंशब्देनगम्यते ॥ इत्यभियुक्तोक्तेः विस्मृत्युच्चारयेत्यादावर्थोच्चारणा
संभवेनविनाशब्दविषयंशब्दबोधासंगतिश्चेतिसोपिप्रातिपदिकार्थः नचलक्षणयानिर्वाहः निरूढल
क्षणायाःशक्त्यनतिरेकात् जबगडदशमुच्चारयेत्यादौशक्यार्थे शक्यसंबंधरूपलक्षणायाअग्रहाच्च
अज्ञातार्थाच्चशब्देरनुपयोगात् गांगामुच्चारयेत्यादिभाषाशब्दानामनुकरणेसाधुतासंप्रतिपत्तेस्तेषांशक्य उं:
भावेनपरतयैवलक्षणायाअसंभवाच्चेत्यभिप्रेत्यघोघादिप्रकृतिक्वचित्प्रातिपदिकार्थइत्याह ॥ शब्दोपियदिभेदे १८

18

न विवक्षा स्यात्तदा तथा नोचेच्छ्रोत्रादिभिः सिद्धोप्यसावर्थो विभासते ॥ यद्यप्यनुकार्यानुकरणयोर्भेदवि
वक्षा तदा शब्दोपि प्रातिपदिकार्थः यदि तु न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोपि अर्थवद्भासते अपि
हेतौ उपस्थितत्वाद्भासत इत्यर्थः अयं भावः अनुकार्यानुकरणयोर्भेदेनुकार्यस्य पदादनुपस्थितत्वान्नाम्नि
द्वये शक्तिरपेया अभेदे प्रत्यक्षविषयस्य हेतुत्वात्तत्प्रत्यक्षरूपं पदजन्योपस्थितिमादाय शाब्दबोध
विषयतोपपत्तिरिति यद्यप्यतिप्रसंगवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुः तथाप्यत्राश्रयतया
वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः निरूपकतासंबंधेन वृत्तिमत एव शाब्दबोधविषयत्वं क-
ल्प्यत इत्यनवद्यम् संबंधस्योभयनिरूप्यत्वात्स्वार्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसंभवाच्चेति उक्तं
च वाक्यपदीये ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा तथैव सर्वशब्दानामेते पृथगवस्थिते इति
विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते इति च २९ ॥ प्रसंगादनुकार्यानुकरणयोरभेदपक्षे साधक-
माह अत एव गवित्याह भूसत्तायामितीदृशम् न प्रातिपदिकं नापि पदं साधु तत्स्मृतम् गवित्य
यमाह भूसत्तायामित्येवमादौ योयमनुकरणशब्दः कार्यान्नाभिद्यते अतस्तेषामर्थवत्त्वाद्यभावाद
र्थवत्सूत्रविद्याद्यप्रवृत्तेर्न पदत्वं न वा प्रातिपदिकत्वं अथ च साधुत्वमिति उपपद्यते अन्यथा प्रत्ययः पर
श्चेत्यपदं न प्रयुंजीतेति निषेधादिदं वचनाद् असाधुत्वापत्तिरित्यर्थः ॥ इति श्रीमद्भट्टोजिभट्टात्मजकौण्डभ
ट्टकृते वैयाकरणभूषणसारे नामार्थनिर्णयः ५ ॥ समासान्विभजते ॥ सुपां सुपा तिङा नाम्ना धातुनाथ

वै॰
म॰
॥१९॥

तिङांतिङा सुबंतेनेति विज्ञेयः समासः षड्विधो बुधैः ॥ सुपांसुपा पदद्वयमपि सुबंतं राजपुरुष इत्यादि
सुपांतिङा पूर्वपदं सुबंतमुत्तरं तिङंतम् पर्यभूषयत् अनुव्यचलत् यातिमतोदात्ववनातिङा [illegible] पि समा
सुपांनाम्नाकुंभकार इत्यादि उपपद तिङ्ङितिसमासः स इति वार्तिकात्समासः ॥ अव गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति परिभाषया
भवति सुबुत्पत्तेः प्राक् अत्रोत्तरपदे सुबुत्पत्तेः प्रागित्यर्थात् अन्यथाच मिंक्रीतो इत्यादौ नलोपानापत्तेः
सुपांधातुना उत्तरपदं धातुमात्रं न तु सुबंतम् कटप्रूः अयतनस्य वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च क्विप्॰
पूर्वपदंसुबंतं तिवार्तिकात् तिङांतिङा पिबतखादता पचतभृज्जतेत्यादि आख्यातमाख्यातेन क्रियासातत्ये इति मय
ूरव्यंसकाद्यंतर्गणसूत्रात् तिङां सुबंतेन पूर्वपदं तिङंतमुत्तरं सुबंतं जहिस्तंभः जहिकर्मणा बहु पदं॰
लमाभीक्ष्ण्ये कर्तारं चाभिदधातीति मयूरव्यंसकाद्यंतर्गणसूत्रात् अयं षड्विधोपि समासः सह सुपेत्यत्र
योगविभागेन भाष्ये कृत्यादितः स्पष्टः शब्दकौस्तुभादौ ॥ २८ ॥ स्वयं भाष्यादिसिद्धं तद्वेदं कृत्वा यथा प्राची
नवैयाकरणोक्तविभागस्यान्यास्यनिव्यास्यादिभिर्मेदो हरणस्य प्रायिकत्वं दर्शयति ॥ समासस्तु चतुर्धे
ति प्रायोवादस्तथापरः योयं पूर्वपदार्थादिप्राधान्यविषयः सच ॥ भीतप्रष्ठ्यांत्सापिरेवागवयादिवदा
स्थितः चतुर्धा अव्ययीभावतत्पुरुषद्वंद्वबहुव्रीहिभेदात् अयं प्रायोवादः भूतपूर्वः ह्यत्र र्कारसः आय
तवत्तः वागर्थाविवेत्यादिसंग्रहात् तथाहि पूर्वपदार्थप्रधानोव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः उ गो॰
भयपदार्थप्रधानो द्वंद्वः अन्यपदार्थप्रधानो बहुव्रीहिरित्यादिलक्षणमपि प्रायिकं उन्मत्तगंगमपम ॥१९॥

ति अर्धपिप्पली द्वित्राः शशकुशपलाशमित्यादौ परस्परव्यभिचारात् तथाहि उन्मत्तगङ्गमित्यव्य
यीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः अन्यपदार्थप्राधान्याद्बहुव्रीहिलक्षणातिव्याप्तिश्च अन्य
२० पदार्थे च संज्ञायामिति समासात् सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्ति
रव्ययीभावाव्याप्तिश्च सुप्प्रतिनामात्रार्थे इति समासात् अर्धपिप्पलीति तत्पुरुषे पूर्वपदार्थप्राधान्य
सत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च अर्धं नपुंसकमिति समासात् एवं पूर्वकाय इत्यादौ
द्रष्टव्यम् द्वित्रा इति बहुव्रीहावुभयपदार्थप्राधान्याद्द्वन्द्वातिव्याप्तिर्बहुव्रीह्यव्याप्तिश्च शशकुशप
लाशमित्यादि द्वन्द्वे समाहारान्यपदार्थप्राधान्याद्बहुव्रीह्यतिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः ॥ सि
द्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम् असंभवश्चैषामित्याह भीतपू
र्वादित्यादि शैवागवयादिनिष्ठलोष्टलादेर्वा तत्पुरुषलक्षणत्ववदेतेषामपि न समासलक्षणत्वम्
बोधकत्वात्तत्तद्देवस्यादिति भावः ॥ ननु पूर्वपदार्थप्राधान्यादि समासेत्ववचम् तथाहि समर्थः
पदविधिरिति सूत्रे भाष्यकारैरनेकधोक्तेषु पक्षेषु जहत्स्वार्थाजहत्स्वार्थपक्षयोर्द्वयोरेकार्थीभाव
व्यपेक्षारूपयोः पर्यवसानं लभ्यते तत्र जहत्स्वार्थपक्षे उक्तव्यवस्थानाश्रभावनेत्याशंकां मनसि कृत्वा
ह ॥ जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा भेदः संसर्ग उभयं चेति वाच्यव्यवस्थितेः ॥ जहति प
दानि स्वार्थं यस्यां साजहत्स्वार्था पदे वर्णवद्वृत्तौ पदानामानर्थक्यमित्यर्थः अयं भावः समासशास्त्रेष्वेव

वै॰ जविशिष्टपुरुषमानसंभवेन राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम् वृषभयावकादिपदेषु वृ
भू॰ षादिपदानामिव अन्यथा राजपदेऽपि विग्रहवाक्यइव राज्ञः स्वातंत्र्येणोपस्थितिमत्त्वा[illegible]स्यात्तः पुरुष नञ॰
२० इत्यत्रेव ऋद्धस्य राजपुरुषइत्यस्याप्यत्रापत्तिरिति अजहदिति न जहति पदानि स्वार्थं यस्यां साजहत् तस्यां ।
20
अयमभिप्रायः राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः कल्पकाभावात् लक्षणया राजादिपदादेवा
र्थोपस्थितिसंभवेन तत्कल्पनस्य गौरवपराहतत्वाच्च लक्षणशक्तित्यागोऽप्रामाणिकः कल्प्येत तथा
चाकांक्षादिवशाल्लक्षणयाक्षैव विशिष्टार्थबोधः अयमेव व्यपेक्षापक्षो मतान्तरत्वेन भाष्यकारैरुक्तः
नचात्रमते समासे ऋद्धस्येति विशेषणान्वयापत्तिः सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति
वार्तिकात् तथाचैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वात् पूर्वपदार्थप्रधानइत्यादिव्यवस्थापि सूपपादेति
भावः प्रसंगात् त्रिभेदमपि निरूपयति तेपुनरिति द्वेअपि वृत्ती त्रिविधे वाच्यत्रैविध्यात् वाच्यमेवाह
भेदइत्यादि भेदः अन्योन्याभावः तथाच राजपुरुषइत्यादौ अराजकीयभिन्नइतिबोधः अस्यावाच्यत्वे
च राजपुरुषः सुन्दरइतिवद्राजपुरुषो देवदत्तस्य चेत्यपि स्यात् वाच्यत्वे तद्विरोधान्नैवं प्रयोगइतिभावः
राजसंबंधवानित्येव शाब्दभाने भेदस्तत्र त्वकालमुपतिष्ठते इत्याशयेनाह संसर्गइति विनिगमनाविरह
अस्वामिकोऽपि राजपुरुषइत्यादिप्रयोगापत्तिं च मनसि कृत्वोभयं वाच्यमित्याह उभयंचेति तथाचाराज भू॰
कीयाभिन्नो राजसंबंधवांश्चायमिति बोधः इत्यपेक्षावादस्यैकवाक्यतात्रिभाष्यविरुद्धत्वात्तन्मूलकः पूर्वपदा २०

र्थइत्याद्युक्तसर्गोप्ययमाशयः किंतद्वाक्यगतयत्नाशयेनोक्तमर्थोपिपदस्यएवबोधकइत्याशयेनसमाधत्ते ॥
समासेत्वभिन्नैवशक्तिःपंकजशब्दवत् बहूनांवृत्तिधर्माणांवचनैरेवसाधने ॥ स्यान्महदर्थोवेत
स्मादेकार्थीभावस्याश्रितः ॥ समासइतिवृत्तिमात्रोपलक्षणम् समर्थःपदविधिरित्यत्रपदमुद्दिश्य
योविधीयते समासादिःससमर्थःविग्रहवाक्यार्थाभिधानेशक्तःसन् साधुरितिसूत्रार्थस्यभाष्या
ल्लाभात् पदोद्देश्यकविधित्वंचकृत्तद्धितसमासैकशेषसन्नाद्यंतधातुरूपास्यपंचस्वपिवृत्तिषुत्वेव
प्र॰ शक्त्यस्वीकारेणंपृथक्त्वादिनामेनदूषणंशक्तिसाधकमेवेत्याशयेनाह पंकजशब्दवदिति पंकजानि
कर्त्रैरपियोगादेवोपस्थितौनत्रापिसमुदायशक्तिर्नसिध्येत् नचपद्मत्वरूपेणोपस्थितयेतत्कल्प्यत
इतिवाच्यम् चित्ररथादिपदेपिस्वामित्वेनोपस्थितयेतत्कल्पनावश्यकत्वात् लक्षणयातथोपस्थिति
रितिचेत्पंकजपदेपिसाम्यवचात् एवंरथकारपदेपि तथाच वर्षासुरथकारोऽग्निमादधीतेत्यत्रापिवि
नालक्षणांलक्षणयोगेनब्राह्मणादिविषयतयोपपत्तौतत्कल्पनांकृत्वाजातिविशेषस्याधिकारित्वं
प्रकल्प्यापूर्वविधायकत्वनमप्ययुक्तंस्यादितिभावः साधकांतरमाह बहूनामिति वृत्तेर्धर्माविशे
षणलिंगसंख्याद्ययोगादयः तेषांचवचनैःसाधनेगौरवमित्यर्थः अयंभावः विशिष्टशक्त्यस्वीका
रेराज्ञःपुरुषइत्यत्रेवराजपुरुषइत्यत्रापिस्यात् विशेषणाद्यन्वयः राजपदेस्वतंत्रोपस्थितिमत्त्वात् न॰
विभाषावचनंचसमासनियमवारणायकार्यम् नचसविशेषणानामितिवचनान्नविशेषणान्वयः वि

वै॰ भाषावचनंचकृतमेवेत्याशंकांसमाधत्ते वचनैरेवेति न्यायसिद्धमेवसूत्रम् व्यपेक्षाविवक्षायांव्यासस्यैका
भू॰ र्थीभावेसमासस्येतिस्वभावतएवप्रयोगानियमसंभवात् सविशेषणेत्यपिविशिष्टशब्दौराज्ञःपदार्थैकदे
ग्र॰ शतयान्वयासंभवात् न्यायसिद्धमितिभावः अतएवव्यपेक्षापक्षमुक्त्वा अर्थेनास्मिन्व्यपेक्षायांसामर्थ्ये
21 योसावेकार्थीभावकृतोविशेषःसवक्तव्यइतिभाष्यकारेणदूषणमप्युक्तम् तथाधवखदिरौ निष्कौशा
म्बिःगोरथः घृतघटः गुडधानाः केशचूडः सुवर्णालंकारः द्विदशाःसप्तपर्णइत्यादावितरेतरयोगादि
क्रांतकृष्णसर्पमिश्रसंख्यातविकारलुक्चार्थपलोपोवीप्सार्थीवाचनिकोवाच्यइत्यपिगौरवंस्यादिति
दूषणांतरमाह ॥ चकारादिनिषेधोथबहुव्युत्पत्तिभंजनम् कर्तव्यंतेन्यायसिद्धंत्वस्माकंनदितिस्थितिः
आदिनाद्यनप्रणामः हंसगमनमित्यादाविवादीनांपूर्वोक्तानांचसंग्रहः दूषणांतरमाह बहुव्युत्पत्ति
भंजनमिति अयमाशयः चित्रगुरित्यत्रस्वाम्यादिप्रतीतिरनुभवसिद्धानचतत्रलक्षणा ग्रामोदकोग्राम
इत्यादौतदसंभवात् ग्रामिकर्तृभिन्नमुदकमित्यादिबोधोत्तरंतत्संबंधिग्रामलक्षणायामप्युदककर्तृक
ग्रामिकर्मकग्रामइत्यर्थालाभात् ग्रामेतिक्तप्रत्ययस्यैकस्यकर्त्रर्थकस्यकर्मणिलक्षणेतिचेत् तर्हिसमा
नाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नंग्रामिकर्मेतिस्यात् अन्यथासामानाधिक
रणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभंगापत्तेः ग्रामेधात्वर्थेनयाकर्तृतासंबंधेनभेदेनोदकस्यतत्रा गो॰
न्वयासम्भवाच्च अन्यथादेवदत्तःपच्यतेइत्यत्रकर्तृतासंबंधेनदेवदत्तस्यान्वयसंभवेनानन्वयानापत्तेः १ २१

अथोदकाभिन्नकर्तृकागामिरितिबोधोत्तरं तत्संबंधिग्रामो लक्ष्यतइतिचेन्न ग्रामेर्धात्वर्थतयाक्रि
र्थकर्तरिविशेषणतायाअसंभवात् प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यप्राधान्यमितिव्युत्पत्तेः ग्रामप
देग्रामेर्विशेष्यत्वेनस्यापत्वनामार्थत्वेनोदकेनसममभेदान्वयापत्तेश्च एवमूढरथः उपहृतपशुः
उद्धृतौदना बहुपाचिकेत्यादावपिद्रष्टव्यम् अत्रापिरथकर्मकवहनकर्तापशुकर्मकोपहरणोद्दे
श्यः ओदनकर्मकोद्धरणावधिबहुपाचककर्त्रधिकरणमितिबोधाभ्युपगमात् अतिरिक्तवृत्तिप
देचघटत्वविशिष्टेघटपदस्येवोदककर्तृकप्राप्तिकर्मत्वविशिष्टेप्राप्तोदकइत्यादिसमुदायशक्तेरे
वनिर्वाहइतिभावः २२ ॥ साधकान्तरमाह ॥ अथषष्ठ्यर्थबहुव्रीहौव्युत्पत्त्यन्तरकल्पना त्वामस्या
गस्त्वालितवतान्किंशक्तिंनकल्पयेः ॥ अयंभावः चित्रगुरित्यादिषुचित्रगोस्वाम्यादिप्रतीतिर्नवि
नाशक्तिमुपपद्यते नचतत्रलक्षणा साहिनचित्रपदे चित्रस्वामीगौरितिबोधापत्तेः नापिगोपदे
गोस्वामीचित्रइत्यन्वयबोधापत्तेः चित्रादिमात्रलक्ष्यैकदेशत्वेनतत्रगवादेरन्वयायोगात् नचवि
त्राभिन्नागौरितिशाब्दबुद्धौप्रत्ययार्थयोरन्वयबोधोत्तरंतादृशगोस्वामीगोपदेनलक्ष्यतइतिवाच्यम् गो
पदस्यचित्रपदस्यवाविनिगमनाविरहेणलक्षकत्वासंभवात् नचगोपदेसाक्षात्संबंधएवविनिगा
मकइतिवाच्यम् एवमपिप्राप्तोदकः कृतविश्वइत्यादिषुषष्ठ्यर्थबहुव्रीहौविनिगमकासत्त्वेः यौगिका
नांकर्त्राद्यर्थकतयासाक्षात्संबंधाविशेषात् नचपदद्वयेलक्षणानिनैयायिकोङ्गीकरोतीतिबोधावृत्तिप्रसं

वै॰ भू॰ २२

22

गात् नचपरस्परंतात्पर्यग्राहकत्वादेकस्यैवैकदालक्षणानङ्गयोरितिनबोधाद्युपपत्तिरितिवाच्यम् एवमपि
विनिगमनाविरहतादवस्थ्येनलक्षणायाअसंभवात् नचचरमपदेएवशक्तिप्रत्ययार्थान्वयानुरोधात् प्र
त्ययानांसन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरितिवाच्यम् एवंहिबहुव्रीह्यसंभवापत्तेः अनेक
मन्यपदार्थेइत्यनेनानेकसुबंतानामन्यपदार्थप्रतिपादकत्वेनविधानात् किंच एवंसतिघटादिपदेपि
चरमवर्णएववाचकताकल्पनास्यात् पूर्वपूर्ववर्णानांतात्पर्यग्राहकत्वेनोपयोगसंभवात् एवंसति
चरमवर्णमात्रश्रवणादर्थबोधापत्तिरितिचेदत्रापिघटकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्य
त्रविस्तरः एवंचाषष्ठ्यर्थबहुव्रीहौलुप्तत्र्यंतरकल्पनेऽत्रायमर्थः अगत्याशक्त्यंतरकल्पनाल्लक्षणत्या
गःलक्षणशक्त्योपपत्तिरितिव्युत्पत्तिस्तत्यागस्तुनवास्ति नाकिंसर्वत्रसमासेशक्तिंनकल्पयेरितिवाक्या
ष्ठैः यत्रव्यपेक्षावादिनोनैयायिकमीमांसकादयः नसमासेशक्तिःराजपुरुषइत्यादौराजपदादेःसं
बंधिलक्षणयैवराजसंबंधाभिन्नःपुरुषइतिबोधोपपत्तेः अतएवराज्ञःपदार्थैकदेशतयानतत्रशोभ
नस्येत्यादिविशेषणान्वयः नचघनश्यामोनिष्कौशांबिर्गोरथइत्यादौविवादिप्रयोगापत्तिः उक्तार्थ
तयाद्वक्तांतादिप्रयोगा[illegible]संभवात् नचविभाषेतिसूत्रावश्यकत्वंलक्षणयाराजसंबंधाभिन्नइतिबु
बोधयिषायांसमासस्यराजसंबंधवानितिबुबोधयिषायांविग्रहस्येत्यादिप्रयोगनियमसंभवात् नापि भू॰
पंकजपदप्रतिबंदीशक्तिःसाधिकातत्रावयवशक्तिमजानतोपिबोधात् नचशक्यग्रहेलक्षणयातेभ्यो २२

विशिष्टार्थप्रत्ययः संभवति अत एव राजादिपदशक्त्यग्रहे राजपुरुषपदाच्चित्रगुरित्यादौ न बोधः नापि चित्रगु
रित्यादौ लक्षणासंभवेपि अनेकपदार्थबहुव्रीहौ लक्षणाया असंभवः बहुव्युत्पत्तिभंजनापत्तेरिति वाच्यम्
प्राप्तोदक इत्यादावुदकपदे एव लक्षणास्वीकारात् सर्वपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययत
दर्थज्ञानसाध्यतया विलंबितत्वात् प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्या चित्रगोरथात्त्व
घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यमाना विशिष्टे कल्प्यते विशिष्टस्यैव संकेतित
त्वात् बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात् प्रकृते चार्थं तं सन्निधानेन प्रत्ययार्थान्वयस्यौ लभ्यायोग्य
पदे एव सा कल्प्यत इति विशेषः स्वीकृतं च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकंमन्यैरित्या
हुः अत्रोच्यते समासे शक्तस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात् अर्थवत्त्वाभावेन अर्थवदधा
तुरप्रत्ययः प्रातिपदिकमित्यस्याप्रवृत्तेः न च कृत्तद्धितसमासाश्चेत्यत्र समासग्रहणं तन्नार्थं नियमार्थं ता
याभाष्यसिद्धाया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् समासवाक्ये शक्त्यभावेन शक्यसंबंधरूप
लक्षणाया अप्यसंभवेन लाक्षणिकार्थवत्त्वस्याप्यसंभवात् अथ तिसमस्तृङित्याभ्यां ङोस्तृहवि
तिप्रत्याहारो भाष्यसिद्धः तमादाय अतिप्प्रातिपदिकमित्येवमस्त्वेतताम् कृत्तमर्थवदादिसूत्रद्वयेन समा
सग्रहणं च नियमार्थमस्तु तथा चातिपूर्तिर्वंत भिन्नं प्रातिपदिकमित्यर्थात् समासस्यापि सा स्यादिति चे
न्न तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाख्यामितादवस्थ्यमेव तथा च प्रातिपदि

मे.

वै. भू. २३ कसंज्ञारूपमेकार्थत्वार्थवत्त्वमनुमापयति धूमइववह्निं किंचैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयाप
त्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः विशिष्टोत्तरमेव प्रत्ययोत्पत्तेः विशिष्टस्यैव प्रकृति
त्वात् यत्तु सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति तन्न उपकुंभं अर्धपिप्पलीत्यादौ
23 पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् नच तत्रापि सन्निधानमेव प्राक्तुपसन्निधेर्विवक्षितत्वात्
शासनिकसन्निधेर्विवक्षितत्वात् तथा च यत्पदोत्तरं याऽनुशिष्टा सा तदर्थगतं स्वार्थं बोधयति समासे च स
मस्यमानपदोत्तरमेवानुशासनमिति वाच्यम् अर्धवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरमेव
विभक्त्यनुशासनात् अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यत इति चेत् तर्हि पंकजमानयद
ण्डेनं पश्य स्थूलिनं पूजयेत्यादौ पंकदंडस्थूलेष्वानयनपूजनादेरन्वयप्रसंगः अयं घटमानयेत्यत्र घटेप्या दर्शन
नयनान्वयापत्तेश्च नच दंडादीनां विशेषणतया न तत्रानयनाद्यन्वयः पाकान्नीलः धर्मात्सुखीत्यादौ पा
कधर्मादिजन्य[illegible] रूपसुखादावन्वयप्रसंगात् यच्च प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्र विक्ष
ङ्गामिति तन्न घटं पश्येत्यत्र घटपदात्समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्यावश्यक
त्वात् अथ प्रत्ययसमवहितपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमिति चेत् न सामानयति कृष्णादण्डेने
त्यत्र कृष्णे तृतीयार्थान्वयप्रसंगात् अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तरविभक्तेः क गों.
ल्प्यत इति चेत् अवलृप्तकल्पनालाघवं व्युत्पत्तित्यागं चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वात् इति दि २३

त्व.

कृ अपि च समासे विशिष्टशक्त्यनङ्गीकारे राजपुरुषः चित्रगुः नीलोत्पलमित्यादौ सर्वत्रानन्वयप्रसंगः
राजपदादेः संबंधिनि लक्षणायामपि तण्डुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तंडुलादेः पाकादावन्व
यवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात् पुरुषा
देस्तथात्वाभावात् तंडुलः शुभ्र इत्यादौ च प्रातिपदिकार्थे प्रथमा तंडुलादेस्तस्य च शुभ्रेऽभेदेनैवा
न्वयः शुभ्रेण तंडुलेनेत्यादौ च विशेषणविभक्तिरभेदार्थो पार्थिको वान्वय इति नातिप्रसंगः तथा च स
मासे परस्परमन्वयासंभवादावश्यकैव समुदायस्य तादृशो विशिष्टार्थे शक्तिः किंच राजपुरुष इत्यादेः
संबंधिनि संबंधे वा लक्षणा नाद्यः राज्ञः पुरुष इति विवरणविरोधात् समाससमानार्थकवाक्यस्यैव वि
ग्रहत्वात् अन्यथा तस्माच्छक्तिनिर्णयो न स्यात् नांत्यः राजसंबंधरूपः पुरुष इति बोधप्रसंगात् विरुद्ध
विभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादिप्रपंचितं वैयाकरणभूषणे अत एव षष्ठ्
कर्तुः प्रथमभक्ष्य इत्यत्र न भक्ष्यशुद्धिरूपप्राथम्यविधानं फलम् एकप्रसरताभंगापत्तेरिति तृतीये
अंशैः स्विष्टकृतं यजतीत्यत्रांगानुवादेन नात्रित्वविधानं फलम् एकप्रसरताभंगापत्तेरिति दशमे च नि
रूपितं संगच्छते संगच्छते चारुणाधिकरणारंभः अन्यथा अरुणया एकहायन्या पिंगाक्ष्या सोमं क्रीणाति
इत्यत्रारुणपदवदितरयोरपि एकत्वादिगुणमात्रवाचकतया अमूर्तत्वात् क्रीणातौ करणत्वासंभव
स्य तुल्यत्वादारुणस्यैव वाक्याद्भेदशंकायामसंभवादिति प्रपंचितं भूषणे तस्मात्समासे शक्तिपदेति जैमि

वै॰
भू॰
२४

24

नीयैरवघ्राणभक्ष्यपेयइत्यासत्तांविलक्षः राजपुरुषइत्यादौराज्ञाचासौपुरुषश्चेत्येवंविग्रहः विग्रहेत्यादौव
विज्ञाणां [stain] गवाद्यमित्येवंसमानार्थत्वानुरोधात् यद्यपिप्रथमांतानामेवबहुव्रीहिरितिशेषोबहुव्रीहिरिति
सूत्राल्लभ्यतेइतिप्रथमांतेपदेवाक्येविज्ञाणावोयसेत्येवसंभवत्येवषष्ठीतिसमासविधानाद्राज्ञःपुरुषइ
तिचपदेवाक्ये तथापितस्यनविग्रहत्वंभिन्नार्थत्वात् किन्तुतत्समस्यैवेतिमीमांसकाः नान्यसेनात्रिरस्य
स्वार्थबोधकमिति ति ॥ आख्यातैस्तद्धितकृतोर्यत्किंचिदुपदर्शितम् गुणप्रधानभावादौतत्रदृष्टोविपर्ययः ॥ तद्धितकृ॰
मितिं॰पदर्शितप दस्य॰ तोर्यत्किंचिदर्थबोधकंविवरणमाख्यातेनतत्रविपर्ययोदृष्टः तथाहि आदिकःकुम्भकारइत्यत्रोत्तकार
न्यत्र॰ णकव्यापाराश्रयःकुम्भानुकूलव्यापाराश्रयइतिबोधः अत्रैवेदीव्यतिकुम्भंकरोतीत्यत्रात्तकरणाका
टेवनानुकूलाभावना कुम्भोत्पत्त्यनुकूलाभावनेनिवाबोधः कृत्प्रत्ययेकारकाणामाख्यातेभावनायाः
प्राधान्यंवदतोमीमांसकस्यापि [stain] गुणप्रधानभावांशव्यत्यासेनविवरणत्वबाधकइतिनात्रपादिकस्य
विज्ञाणावोयसेत्यादेर्वि[stain]ग्रहत्वेबाधकमस्तीतिभावः नन्वस्तत्करीत्यासर्वत्रसमासेशक्तिरस्तुचत॰
ष्ठाविग्रहस्तथापिषष्ठीतत्पुरुषकर्मधारययोःशक्तिरस्त्वविशेषान्निषादस्थपत्यधिकरणसिद्धान्तसिद्धि
रस्यादित्यतआह ॥ पर्यवसानाच्छाब्दबोधाविरहप्राक्क्षणस्थितेः शक्तिग्रहेनरंगत्वबाहिरंगत्वचिंतनम्
पर्यवसानेस्वार्थोपस्थाशाब्दबोधस्तुतस्मादविरहस्त्वासौप्राक्क्षणस्तुतदानींतनलाघवमादायाधिकरणवि॰ जै॰
रोधइत्यर्थः अयंभावः निषादस्थपतिपदंसमासशक्तिपक्षेनिषादरूपेतिषादानांचस्थपतौनिषादस्था २४

मिकेप्रकृष्टांतरेचेन्नैवंसर्वत्रशक्तत्वाज्ञानार्थे तथाचनानार्थेनान्यतरार्थोद्विशेषावगतिरितिन्यायेनतत्कर
ल्पनायांपदद्वयेनपूर्वोपस्थितार्थेपवोपस्थित्यादिलाघवात्तत्कल्पनतइतिपरेषामपिसंमतिनान्यथैवषष्ठीः
प्रवेशयेनिवल्लक्षणायाइर्वारत्वाज्ञानार्थमेवकल्पकोदावविशिष्यतेइतिदिक् २४ ॥ इतिश्रीवैयाक
रणभूषणसारेसमासशक्तिनिरूपणम् ५ ॥ शक्तिप्रसंगात्तस्याःस्वरूपमाह ॥ इंद्रियाणांस्वविषये
ष्वनादिर्योग्यतायथा अनादिरर्थैःशब्दानांसंबंधोयोग्यतातथा ॥ इंद्रियाणांचक्षुरादीनांस्वविषयेषु
चाक्षुषेषुघटादिषुयथाऽनादिर्योग्यतातदीयचाक्षुषादिकारणता तथाशब्दानामप्यर्थैःसहतद्बोधप
कारणतैवयोग्यतासैवशक्तिरित्यर्थः नतुतद्बोधकारणत्वमनादिभूतंशक्तिः आधुनिकदेवदत्तादि
पदेतदभावात् अन्यथापित्रादिसंकेतात्ज्ञानेप्यन्वयबोधप्रसंगः लाक्षणिकातिव्याप्तेश्चेतिसंकेतज्ञा
नमपिहेतुर्वाच्यम् तथाचावश्यकत्वात्सएवशक्तिरस्तु सचाधुनिकोपित्रादेर्गवादौचेश्वरस्येतिचेत्
अत्रोच्यते संकेतोनस्वरूपेणहेतुः अगृहीतशक्तिकादर्थबोधप्रसंगात् नापिसामान्यतोज्ञातः प्रमेय
त्वादिनातज्ज्ञानेपिबोधप्रसंगात् नापिसंकेतत्वेनज्ञानंहेतुः गवादिपदेषीश्वरादेःसंकेतत्वेनतज्ज्ञा
नशून्यानांलौकिकमीमांसकादीनांततदर्थबोधजनकत्वग्रहवतामेवबोधेनव्यभिचारात् नचार्थ
धीजनकतावच्छेदकत्वेनतज्ज्ञानंहेतुः ततोपिलाघवेनार्थधीजनकत्वेनैवहेतुतायाअस्मत्पदसिद्धेः
नचाधुनिकदेवदत्तादौसंकेतज्ञानादेवबोधेनास्यव्यभिचारः तत्रापीदंपदमेतमर्थंबोधयत्वितीच्छाया

हेपदेनतदर्थबोधकत्वस्यावगाहनेनव्यभिचाराभावात् नचस्वानन्त्र्येणबोधकत्वात्ज्ञानंकारणंवाच्यम् अन्यर
थानेदंतज्ज्ञीजनकमितिजानतोस्माद्घटाद्यमर्थोबुद्धोनेनेतिजानतस्तद्ग्रहापत्तेरितिवाच्यम् नेदंतज्ज्ञीजन
कमितिशब्दवताबोधेनपदेपरशब्देजानतोपितद्ग्रहासंभवात् अन्यथाभ्रान्तिज्ञानस्यापिभ्रान्तत्वापत्तेरिति इदं
चार्थधीजनकत्वेपित्रादिसंकेतज्ञानाद्गृह्यते अतस्तज्ज्ञानात्पूर्वंनबोधः नापिलाक्षणिकोच्छेदापत्तिरिष्ट
त्वात् शक्तिग्राहकव्यवहारस्यप्रत्यलक्षणासाधारणत्वात् किंच प्रत्यक्षादिजन्योपस्थितेःशाब्दबोधानं
गत्वात् शाब्दबोधंप्रतिशक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्चकारणत्वंवाच्यम् तथाच कार्यकार
णभावद्वयकल्पनेगौरवंस्यात् अस्माकंपुनःशक्तिजन्योपस्थितित्वेनैवहेतुतेतिलाघवं अपिच लक्ष
णास्वीकारेकार्यकारणभावस्यप्रत्येकंव्यभिचारःशक्तिजन्योपस्थितिंविनापिलक्षणाजन्योपस्थित
तःशाब्दबोधात् नचाव्यवहितोत्तरत्वसंबंधेनतत्तदुपस्थितिमत्त्वंकार्यतावच्छेदकम् तत्तदुपस्थितित्वंचका
रणतावच्छेदकम् अनन्तकार्यकारणभावप्रसंगात् किंच पदार्थोपस्थितिंप्रत्यपिशक्तिज्ञानत्वेनलक्षणा
ज्ञानत्वेनचहेतुतेतिव्यभिचारोगौरवंचप्रागवदेवद्रष्टव्यम् नचेदंपदमेतदर्थबोधकमितिशक्तिज्ञानकार्य
कारणभावकल्पनेपिपदार्थभेदेनानेककार्यकारणभावकल्पनेगौरवंतवापिसमानं परस्परंव्यभिचार
वारणायाव्यवहितोत्तरत्वंतत्त्वेचसुतरामितिवाच्यम् शक्तिभ्रमानुरोधेनतत्तत्पदतत्तदर्थभेदेनकार्यकार
णभावानन्त्यस्यतवापिमास्यात् लक्षणाकार्यकारणभावकल्पनागौरवंतवातिरिच्यते अथवृत्तिजन्योपस्थि

त्रुटि.

तित्वेनैव शाब्दबोधे हेतुताग्रहितज्ञानत्वेन च पदार्थोपस्थितिं प्रति कारणतेत्येवं मया वाच्यमिति चेन्न शक्तिल
क्षणान्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसंबंधत्वस्य वा वृत्तित्वस्य कारणतावच्छेद
कत्वात् शक्तित्वमपेक्ष्य गौरवात् शाब्दबोधहेतुतावच्छेदकस्य पदार्थोपस्थितिजनकवृत्तेर्ज्ञानत्वेन तद्धृदि ना
न कार्यकारणभावग्रहस्यासंभवात् अथ ममापि शक्तिज्ञानत्वेनैव हेतुता वाक्यसंबंधरूपलक्षणायां श
क्तेरपि प्रवेशादिति चेन्न शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्वस्यावश्यकत्वा
त् अन्यथा गंगातीरयोः संबंधाग्रहणवतो गंगापदशक्तिज्ञानवतोपि गंगायां घोष इति वाक्यात्तीरबोधप्रसं
गः शक्तिज्ञानस्य हेतोः सत्त्वात् अपि च घटमानयेति वाक्ये हस्तिनं च स्मरतो घटपदादिभ्यो घटादेर्गजादेर्ह
स्तिपकस्य च समूहालंबनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः समूहालंबनरूपायो
पदार्थोपस्थितेः शक्तिजन्यत्वसत्त्वात् तथा च विषयतया शाब्दबोधं प्रति तदंशविषयकवृत्तिजन्योपस्थि
तिर्हेतुरिति वाच्यः एवं च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसंभवदुक्तिकमिति एतेन शक्तिप्रयो
ज्यैवोपस्थितिर्हेतुरिति न लक्षणाज्ञाने कार्यकारणभावांतरं ममापीति परास्तम् प्रयोज्यत्वस्यातिप्रस
क्तस्य दुर्वचत्वाच्चे[illegible]त्यादि विस्तरेण प्रपंचितं भूषणे ३९ ॥ नन्वेवं भाषादितो बोधदर्शनाद्बोधकतारूपा
शक्तिस्तत्रापि स्यात् तथा च साधुता स्यात् शक्तत्वस्यैव साधुतायां व्याकरणाधिकरणे प्रतिपादनादित्या
शंकां द्विधा समाधत्ते ॥ असाधुरनुमानेन वाचकः कैश्चिदिष्यते वाचकत्वाविशेषेण नियमः पुण्यपापयोः

वै॰ भू॰ २६
26

असाधुर्गोण्यादिः अनुमानेन साधुशब्दम् अनुमाय वाचको बोधकः कैश्चिदिष्यते तथा च लिपिविशेषो साधुस्मर
णएवोपयोगो न तु साक्षाद्वाचकत्वम् अतो न साधुत्वमिति भावः उक्तं हि वाक्यपदीये ॥ ते साधुष्वनुमानेन
प्रतीयोत्पत्तिहेतवः तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ते यतः
स्मृतिमात्रेण तस्मात्साक्षादवाचकाः अंबांबेति यदा बालः शिक्ष्यमाणः प्रभाषते अव्यक्तं तद्विदां तेन व्यक्ते
भवति निर्णयः एवं साधौ प्रयोक्तव्ये योपभ्रंशः प्रयुज्यते तेन साधुव्यवहितः कश्चिदर्थोभिधीयते ॥ न
न्वपभ्रंशानां साक्षाद्वाचकत्वे किं मानं शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेत् सत्यम् तत्र देशभेदे
न भिन्नेष्वपि शक्तिकल्पने गौरवात् न च पर्यायतुल्यता शंक्या तेषां च सर्वदेशेष्वेकत्वाद्विनिगमनाविरहेण
सर्वत्र कल्पनान्न त्वपभ्रंशे तथा अन्यथा भाषाणां पर्यायतया गणनापत्तेश्च एवं शक्तत्वमेवास्तु साधुत्वमिति
नैयायिकमीमांसकादीनां मतं तन्मते नैव दूषयन् इदानीं स्वमतमाह वाचकत्वाविशेषेणेति अयं भावः
अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् न च साधुस्मरणात्ततो बोधः तानविदुषां पामराणामपि बोधा
त् तेषां साधोरबोधाच्च न च शक्तिभ्रमात्तेभ्यो बोधः बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात् ईश्वरेच्छा शक्ति ए॰
रिति मतेपि सन्मात्रविषयिण्यास्तस्याबाधाभावात् शक्तेः पदार्थपदविशेषघटिताया भ्रमासंभवाच्चेति
उक्तं च वाक्यपदीये पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु प्रसिद्धिमागता येषु तेषां साधुरवाचकः दै गो॰
वी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्ययः इति अवाचकः अबोध २६

कः बुद्धिविपर्ययः एतेएववाचकानान्येइतिविपर्ययइत्यर्थः किंचविनिगमनाविरहाद्भाषायामपिशक्तिः
नचतासांनानात्वंदोषः संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेनप्रत्येकंविनिगमनाविरहेतादवस्थ्यात्
किंचानुपूर्वीपदेवच्छेदिका साचपर्यायेष्विवभाषायामप्यन्यानुवेनिकस्तयोर्विशेषइतिभाव्यंसूरिभिः
तथाचसंस्कृतवद्भाषाशब्दाः शक्ताएव नचपर्यायतयाभाषाणांगणनापत्तिः साधूनामेवकोशादौवि
भागाभिधानात् नन्वेवंसाधुतातेषांस्यादित्यतआह नियमइति पुण्यजननबोधनायसाधूनांसाधुभि
र्भाषितव्यमितिविधिः पापजननबोधनायनासाधूनामितिनिषेधः तथाच पुण्यजननयोग्यत्वंसाधुत्वं
पापजननयोग्यत्वमसाधुत्वं तत्रजनकतावच्छेदिकाचजातिः तज्ज्ञापकंचकोशादिव्याकरणादिच
एवंचराजसूयादेर्ब्राह्मणेफलजनकत्ववद्गवादिशब्दानांनत्वस्यादौसाधुत्वमितिसंगच्छते आधुनि
कदेवदत्तादिनाम्नामपिब्रह्महत्यरमित्यादिभाष्येणाव्युत्पादितत्वात्साधुत्वम् एवंचयःशब्दोयत्रार्थेव्याक
रणेव्युत्पादितःसतत्रसाधुरितिपर्यवसितंगौणानांगुणेव्युत्पादनात्तत्स्वरसंस्कारेणप्रवृत्तौसाधुत्वमेव
आधुनिकलाक्षणिकानांत्वसाधुत्वमिष्टमेव अतएवब्राह्मणायदेहीत्यर्थेब्राह्मणांदेहीत्यादिलक्ष कं॰
णयाप्यसाधुरित्यादिविस्तरेणप्रपंचितंभूषणे ३० ॥ अतिरिक्तशक्तिग्रहोपायमाह ॥ संबंधशब्देसं
बंधोयोग्यताप्रतियोग्यता समवायोयोग्यतासंविन्मातापित्रादियोगवत् ॥ संबंधोविषयः योग्यताप्र
तियोग्यताशब्दप्रतियोग्यताविषयइतिसमवायाद्यवहारात् योग्यतासंवित्शक्तिग्रहः घटपदमत्रयोगं

वै॰ भू॰ २२

27

पतत्संबंधीतिव्यवहारात्साग्राह्येत्यर्थः २८ ॥ इतिश्रीमद्रंगोजिभट्टात्मजकौण्डभट्टविरचितेवैयाकरणभूषण
सारेशक्तिनिर्णयः ॥ नञर्थमाह ॥ नञ्समासेचापरस्यप्राधान्यात्सर्वनामता आरोपितत्वंनञ्द्योत्यं
नह्यसौवातिसर्ववत् ॥ नञ्समासेअपरस्योत्तरपदार्थस्यप्राधान्यात्सर्वनामतासिध्यतीतिशेषः अतएवारो
पितत्वंनञ्द्योत्यमित्यभ्युपेयमितिशेषः अयंभावः असर्वइत्यादावारोपितः सर्वइत्यर्थे सर्वशब्दस्यप्राधा
न्याबाधात्सर्वनामतासिध्यति अन्यथातिसर्वइत्यत्रेवसानस्यात् घटोनास्तीत्यादावभावविषयकबोधे
नस्यविशेषणतायाएवदर्शनात् असञ्जीत्याचसआर्थोबोधोमानसः तथाचासर्वस्मैइत्यत्राप्यसिद्धिप्रसंग
इति अत्रचारोपितत्वमारोपविषयत्वंआरोपमात्रमर्थोविषयत्वंतुसंसर्गइतिनिष्कर्षः द्योत्योक्तिर्निपा
तानांद्योतकत्वमभिप्रेत्य २९ ॥ घटोनास्तिअब्राह्मणइत्यादावारोपबोधस्यसर्वानुभवविरुद्धत्वात्पक्षां
तरमाह ॥ अभावोवातदर्थोस्तुभाष्यस्याहितदाशयात् विशेषणंविशेष्योवान्यायतस्त्ववधार्यताम् ॥
तदर्थोनञर्थःअर्थपदंद्योतकत्ववाचकत्वपक्षयोःसाधारण्येनकीर्तनायभाष्यस्येति तथाच नञ्सूत्रेम
हाभाष्यं निवृत्तपदार्थकइति निवृत्तःपदार्थोयस्य नपुंसकेभावेक्तः इतिक्तः अभावार्थकइत्यर्थः यत्तु
निवृत्तःपदार्थोयस्मिन्नित्यर्थः सादृश्यादिनाध्यारोपितब्राह्मणःक्षत्रियादयोर्थोयस्येत्यर्थइतिकय्य
टः तत्रारोपितब्राह्मणस्यक्षत्रियादेर्नञ्वाच्यत्वात् अन्यथासादृश्यादेरपिवाच्यतापत्तेः यत्तु । तत्सादृश्य गं॰
मभावश्चतदन्यत्वंतदल्पता अप्राशस्त्यंविरोधश्चनञर्थाःषट्प्रकीर्तिताः । इतिपठित्वा अब्राह्मणः अ २२

पापं अनघः अनुदात्तकन्या अपशावोवान्येयोऽस्मभ्यः अथर्मे इत्युदाहरंति तत्र आर्थिकार्थमभिप्रेत्येति
स्पष्टमन्यत्र विशेषणामिति प्रतियोगिनीति शेषः तथाचासर्वपदे सर्वनामसंज्ञा अनेकमन्यपदार्थे सेय
नेनेकयासन्नतापांगयेत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः अन्नास्यणाइत्यादावुत्तरपदार्थप्राधा
न्यात्तत्पुरुषत्वम् अत्वंभवसि अनहंभवामीत्यादौ पुरुषवचनादिव्यवस्थाचास्योपपद्यते अन्यथात्वद
भावोमद्भाव इत्यादिवद्भावांशे कष्टसदेतद्वन्वयेन फलसामान्याधिकरण्यस्यातिइष्टसन्नासत्पु
षव्यवस्थानस्यात् अस्मिन्पक्षेनेच भेदप्रतियोगित्वदभिन्नार्थिकाभवनक्रियेत्यन्वयात्सामानाधिकरण्यं
नानुपपन्नमिति भावः विशेष्योवेति प्रतियोगिनीति शेषः अयंभावः गौणत्वेपि नञ्समासे पतन्नदोः
हलोपोकोः नञ्समासे हलीति ज्ञापकात्सर्वनामसंज्ञानानुपपन्ना अतःशिव इत्यत्र हलोपवारणायान
ञ्समासे इतिहि विशेषणं नचतत्रतच्छब्दस्यसर्वनामतास्ति गौणत्वात् अकोरित्यकच्सहितस्याप्युस्यासर्
वनाम्नोपवादग्रहणलाभात् तथाचनञ्समासे इति ज्ञापकं वचम् अनेकमन्यपदार्थे इत्यादावेकवचनम १३
वविशेषानुरोधात्स्ववामेचिनेपरांगवत्स्वरे इत्यतोऽनुवर्तमानं स्वग्रहणं विशेष्यमेकवचनांतमेव किंचा
नेकशब्दाद्द्विवचनोपादाने बहूनां बहु वचनोपादाने द्वयोर्बहुव्रीहिर्नसिध्येदित्युभयसंग्रहायैकवचनं
जात्यभिप्रायकमौत्सर्गिकं वा सेयतेनेकयेत्यत्रापि योषयेति विशेष्यानुरोधात्प्रत्येकमेवनान्वयबोधनाय
चैकवचनं तत्रत्तरपदार्थप्राधान्यप्रयुक्तम् अतएवपतंत्यनेके जलधेरिवोर्मय इत्यादिकमपि सूपपादं

वै॰ भू॰ २८ त्वं भवसीत्यादौ युष्मदस्मद्भिन्नत्वेन लक्षणा नञ् द्योतकः तथाच भिन्नेन युष्मदर्थेन तिङः सामानाधिक
रण्यात् युष्मद्भवस्यात्वद्भिन्नाश्रयिका भवनक्रियेति शाब्दबोधः एवं च त्वं पचसीत्यत्र त्वदभिन्नाश्र
यकपाकानुकूलभावना घटो नास्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः असमस्त
28 नञः क्रियायामेवान्वयात् स चाभावे त्यन्ताभावत्वादन्योन्याभावत्वादिरूपेण शाब्दः तत्तद्रूपेण बोधादि
त्याद्यन्यत्र विस्तरः ॥ ५॰ ॥ इति श्रीवैयाकरणभूषणसारे नञर्थनिर्णयः ॥ प्रादयो द्योतकाश्चादयो वा
चका इति नैयायिकमतमयुक्तम् वैषम्ये बीजाभावादिति ध्वनयन् निपातानां द्योतकत्वं समर्थयते ॥ द्योत
काः प्रादयो येन निपाताश्चादयस्तथा उपास्यते हरिर्हरौ लकारो दृश्यते यथा ॥ येन हेतुना प्रादयो द्योत
कास्तेनैव हेतुना चादयो निपातास्तथा द्योतका इत्यर्थः अयं भावः ईश्वरमनुभवतीत्यादावनुभवः प्रती
यमानो न धात्वर्थः भवतीत्यत्राप्यापत्तेः नोपसर्गार्थः तथासति प्रकृत्यर्थेन तया तत्राख्यातार्थानन्वया
पत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः अनुगच्छतीत्यादावनुभवादिप्रत्ययापत्तेश्च न वि
शिष्टार्थः गौरवात् तथाच धातोरेव विद्यमानत्वादिवाचकस्यात्र लक्षणा उपसर्गस्तात्पर्यग्राहक इत्येत
तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति तत्त्वादिष्वपि तुल्यम् चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्टं चै
त्रपदलक्ष्यमिवशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वादिति स्वयं स्पष्टयन्नंतरमाह उपास्यते इति अत्रोपासना गो॰
किमुपसर्गार्थविशिष्टस्य धात्वर्थमात्रस्य वा नाद्यः तथासति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसक २८

कर्मकत्वस्यास्य धातोरुपासनाद्युपफलवाचकत्वाभावादनापत्तेस्तेन कर्मणि लकारो न स्यात् न द्विती
यः गौरवात् तृतीयेत्यागतं द्योतकत्वं तात्पर्यग्राहकत्वलाभादिति भावः दृश्यते इत्यत्र कर्मणि निषेधः प्र
तत्त्वादिद्विषयित्वमित्याह ॥ यथान्यत्र निपातेपि लकाराः कर्मवाचकाः विशेषणाद्ययोगोपि प्रादिवद्द्यो
तके समः ॥ अन्यत्र साक्षात्क्रियते अलंक्रियते ऊरीक्रियते शिव इत्यादौ अत्रापि धातोस्तदर्थे कर्मणि ल
कारसिद्ध्यर्थं तत्तदर्थबोधकत्वं वाच्यमित्युपसर्गवद्द्योतकत्वमेषामपीत्यर्थः यद्यपि कृधातोः सकर्मक अ॰
त्वमस्त्येव तथाप्येतदर्थे सकर्मकता न स्यात् अन्यथा वायुर्विकुरुते सैन्धवा विकुर्वत इत्यत्रापि स्यादिति भा
वः अथोपासनं साक्षात्कारादिर्निपातार्थोस्तु साक्षात्त्वमन्यत्वं तत्त्वयोरिति को दोषस्तस्मात् न तदुक्तलो
व्यापार एव धात्वर्थोस्तु स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारत्वं सकर्मकत्वमपि सुव व॰
चमिति दृष्टान्तदार्ष्टान्तिकाव युक्तावितिनेदं साधकमिति चेन्न नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासं
भवान्निपातार्थधात्वर्थयोरन्वयस्यैवासंभवात् अन्यथा तण्डुलः पचतीत्यत्रापि कर्मतया तण्डुलानां धात्वर्थे
न्वयापत्तेरिति किंच प्रादीनां वाचकत्वे भूयान्प्रकर्षः कीदृशो निश्चय इतिवद्भूयान्प्रकीदृशो निश्चित्यपि स्या
त् अस्मिन्मते प्रादेरनर्थकत्वान्नान्वय इत्यत एव द्योतकतानेषां स्यादिति साधकान्तरमभिप्रेत्याह विशेषणे
ति शोभनः सम्बुद्ध्यो दृष्टव्य इतिवच्छोभनसुदृष्टव्य इत्यस्याप्यापत्तेस्तत्त्वसमाधेयत्वादिति भावः अपि च
निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासंभवः अन्यथा राजा पुरुष इत्यत्राप्याप

वै॰ न्नैरित्यभिप्रेत्याह प्रादीति धवखदिरयोः गुडूच्यश्च इतिवद्धवस्य च खदिरस्य चवेत्येव स्यादितिभावः ध्व ॥ ननु प्रा
भू॰ तिपदिकार्थयोर्भेदेनान्वयबोधे विभक्तिजन्योपस्थितिर्हेतुरितिकार्यकारणभावोनिपातातिरिक्तविषयएवे
तिनोक्तदोषइत्याशंक्याह ॥ पदार्थः सदृशान्वेतिविभागेनकदाचिन निपातेतरसंकोचेप्रमाणंकिंविभाव
29 य ॥ सदृशासदृशेनसमानाधिकरणेनेतियावत् अन्वेतिअभेदेनेतिशेषः विभागेनासमानाधिकरणेनेति
यावत् अयमर्थः समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेतिकल्पनेमा
नाभावेगौरवंचास्माकंनिपातानांद्योतकत्वादन्वयएवनास्तीतिनायंदोषः अतएवघटोनास्तीत्यादौघटप
देनतत्प्रतियोगिकेलाक्षणिकामितिनैयायिकाः ध्व ॥ अपिच निपातानांवाचकत्वेकाव्यादावन्वयएवन
स्यादितिसाधकांतरमाह ॥ शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव इत्यादावन्वयोनस्यात्सुपांचश्रवणं
तनः ॥ अत्रोस्रसदृशैः शरैरसदृशान्नदीच्यानुद्धरिष्यन्नित्यर्थः अयंचोस्रादिशब्दानांतत्सदृशपरत्वेइ
वशब्दस्यद्योतकत्वेसत्येवसंगच्छते अन्यथाप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः त
थाहि उस्रैरितिकरणेतृतीयानचात्रोस्रैः करणंइवशब्दार्थस्यकरणत्वेपितस्यकरणत्वेनानेनबोधयितुं
शक्यमप्रकृत्यर्थत्वात्इवशब्दस्यचासत्त्वार्थकतयातदुत्तरंतृतीयासंभवात् संभवेवाश्रवणप्रसंगात् उ याग्र॰
स्रपदोत्तरंतृतीयानन्वयप्रसंगाच्चेत्याह सुपांचेति सुपांश्रवणंचेत्यर्थः चकारादुस्रपदोत्तरतृतीयानन्व गं॰
यः समुच्चीयते इत्यादावित्यादिपदाद्वागर्थाविवसंपृक्तौपार्वतीपरमेश्वरौ वंदेइत्यत्रवागर्थयोर्वैदिकम ३१

त्वाभावान्नञ्द्वितीयायाश्चानन्वयइवार्थस्यकर्मत्वबोधकात्संभवस्तुसंगच्छेतेते यदिचविशेषणविभक्ति
रभेदार्थेसाधुत्वमात्रार्थावानदापिदुष्परिहृत्स्ववाचकत्वेनान्वयएव उक्तस्सहृदशशराणांस मानाधिक
रणपदोपस्थाप्यतयाभेदेनान्वयायोगात् वायादभेदेनापिनसः स्त्राभिन्नसङ्ख्याभिन्नाःशराद् नञ्युः
पिसंभवतीति त्यर्थोद्रष्टव्यः ५४ ॥ नन्वत्वन्मतेब्राह्मणइत्यादौतत्पुरुषलक्षणाव्याप्तिः पूर्वपदस्यानर्थकत्वेनो
त्तरपदार्थप्राधान्याभावात् उपसर्गस्यार्थवत्त्वाभावेनप्रातिपदिकत्वाभावाद्विभक्तिश्चततोनस्यादित्यत
आह ॥ नञ्समासेचापरस्यद्योत्यत्वमप्रत्येवश्रुत्युपपत्ता द्योतमेवार्थमादायजायेतेनामतःस्वपः ॥ नञ्समासेऽ
र्थेत्तरपदप्रधानतासाद्योत्यार्थमादायैवतमेवार्थमादायार्थवत्त्वात् प्रातिपदिकत्वमित्यर्थः वस्तुत
श्चाद्ययादाप्सुपइतिज्ञापकात्सुबुत्पत्तिः निपातस्यानर्थकस्येतिवार्तिकाद्वाप्रातिपदिकत्वं कृत्तद्धितस
मासाश्चेत्यत्रकृत्समस्तचयार्थकचकारेणनिपातानांसंग्रहइतिबोध्यम् नस्माधक्रन्नेनिपातानांद्योतकत्वे
उक्तेर्चेत्तत्याधिकरणवार्तिके । चतुर्विधेपदेचात्रद्विविधस्यार्थनिर्णयः क्रियतेसंशयोत्पत्तेर्नोपसर्गनि
पातयोः तयोरर्थाभिधानेहिव्यापारोनैवविद्यते यदर्थद्योतकौतौतुवाचकःसविचार्यतेइति उपसर्गेण
धात्वर्थोबलादन्यत्रनीयते प्रहाराहारसंहार विहारपरिहारवदितिवृद्धोक्तादुपसर्गपदंनिपातोप
लक्षणंधातुपदंपदान्तरस्येतिबोध्यम् ५५ ॥ नन्वन्वयव्यतिरेकाभ्यांनिपातानांतत्तदर्थवाचकत्वमेव
फलकर्मबोधकताहृपशङ्केरेबाधास्तुकिंचोक्तरीत्याप्रत्ययादौधातोरेवकालविशिष्टभावनायांलक्षणात्

वै॰ तात्पर्यग्राहकत्वमात्रे तिङादेः स्यादित्यरुचेः पक्षान्तरमाह ॥ निपातानां वाचकत्वमन्वयव्यतिरेकयोः ॥ यु
भू॰ क्तं वा न तु तद्युक्तं परेषां मतमेव नः ॥ एवं च धात्वर्थप्रातिपदिकार्थयोर्भेदान्वयबोधो न व्युत्पन्न इति निपाता
३० तिरिक्तविषये समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वयबोध इत्यपि तथैवागत्या कल्पनीयमिति भावः
30 न त्विति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमित्यर्थः यत्तु सर्वेषां निपातानां वाचकत्वेऽर्थवत्त्वेन तेषां प्राति
पदिकत्वसंभवान्निपातस्यानर्थकस्येति सर्वेषां विधिवैयर्थ्यं सर्वेषां द्योतकत्वे चानर्थकस्येति व्यर्थम् तथा च
५७ केचिद्द्योतकाः केचिद्वाचका इत्युपेयमिति तन्न एवं हि चादयो द्योतकाः प्रादयो वाचका इति वैपरीत्यापत्तेश्च
रणात्सर्वेषामनर्थकानां पादपूरणमात्रार्थमुपात्तानां संग्रहाय वार्त्तिकारम्भस्य कैयटादौ स्पष्टत्वाच्च तस्य
प्रत्याख्यातत्वाच्च परेषामिति बहुवचनं मीमांसकसंग्रहाय केवलहृत्रशब्दात्समुच्चयाबोधाच्चकारश्र
वणात्तद्बोधाच्चकार एव तद्वाचको न द्योतकः किं च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या चकारादेर्द्यो
तकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति समुच्चयाधिकरणोपस्थितं तदपि न युक्तमिति भावः तथा हि अ
न्वयव्यतिरेकौ तात्पर्यग्राहकत्वेनाप्युपपन्नौ पटादिपदानामेव च समुच्चये लक्षणा तात्पर्यग्राहकप्रकरणा
दिवच्चादिरिति स्वीकारान्न शक्तिद्वयकल्पनाप्यस्माकं लक्षणाग्रहणदशायां बोधात्तत्कार्यकारणभावश्चाव
श्यकः एवं शक्तिग्रहस्यापीति पदद्वयेऽपि कल्प्यान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम् अ रा॰
त एव स वाचको विशेषाणामसंभवात् द्योतको वेति वाक्यपदीयं संगच्छते दर्शनान्तररीत्या वाचकत्वमेव न यो ३०

तकत्वमितिनियमस्तन्नयुक्तइतिध्वनयन्नाह, तमेवेति,, पर्यवस्यति उपसंहरन्नाह ॥ निपातत्वेपरेषां
यद्वदस्माकमितिस्थितिः व्यापकत्वाच्छक्ततायास्तदवच्छेदकमिष्यते ॥ परेषांयन्निपातत्वंसत्त्वार्थ
कत्वेसतिचादिगणपठितत्वंशक्तिसंबंधेननिपातपदवत्त्वंचोपाधिर्नान्निर्वान देवास्माकमपि परंतु
सामान्यधर्मप्रमाणानांपदानांच्छक्ततायोतकतातदवच्छेदेनैवकल्प्येतिनैयायिकोक्तंप्रादिवाद्यो
वैषम्यमयुक्तमित्यर्थः व्यापकत्वात्सामान्यत्वात् शक्ततायाइत्युपलक्षणं द्योतकतायावेत्यपिद्र
ष्टव्यम् ४० ॥ इतिश्रीमद्रंगोजिभट्टात्मजकोण्डभट्टविरचितेवैयाकरणभूषणसारेनिपातद्योतक-
त्वादिनिर्णयः ॥ भावप्रत्ययार्थमाह ॥ कृत्तद्धितसमासेभ्योमतभेदनिबंधनं त्वतलोर्थकथनंटी
कायांहरिणाकृतम् ॥ कृत्तद्धितसमासेभ्यः संबंधाभिधानंभावप्रत्ययेनान्यत्रतु रूढाभिन्नरूपाव्यभि
चरितसंबंधेभ्यइतिवार्तिकवचइतिमीमांसकादीनांभ्रमसपाकर्तुमाह टीकायामिति भर्तृहरिणा
महाभाष्यटीकायामित्यर्थः त्वतलोरिति भावप्रत्ययमात्रोपलक्षणम् अयमर्थः समासादौषष्ठ्या
दिः कल्प्यमानाराजादिसंबंधविशिष्टेकल्प्यतइत्युक्तम् तथाचतत्रभावप्रत्ययः संबंधंवदती
त्यर्थः एतदपिभेदसंसर्गः उभयंचेत्युक्तेष्वभेदपक्षेनसंभवतीत्यतआह मतभेदेति पक्षभेदेनेत्यर्थः
एवंचराजपुरुषत्वंऔपगवत्वं पक्तृत्वमित्यादौस्वस्वामिभावः अपत्यापत्यवत्संबंधः क्रियाकारका-
भावश्चसंबंधइत्यन्वयबोधः औपगवादावव्यभिचरितसंबंधेतत्रअर्थोत्तरवृत्तिस्तद्धितउदाहार्यः टामी

वै॰
भू॰
१
31

दण्डत्वं कृष्णसर्पत्वमित्यादौ जातिविशेषणबोधादाह अन्यत्रेति रूढिशब्दभिन्नरूपादव्यभिचरितसंबंधेऽभ्युपगन्त
व्येत्यर्थः रूढिरुक्ता द्वितीयं यथा शुक्लत्वं अत्र न दण्डस्यास्यास्मिन्निति मतुपो गुणवचनेभ्यो मतुपो लुगिष्ट
तिलुप्तत्वात् तद्धितान्तत्वेपि पटः शुक्ल इत्यभेदप्रत्ययाच्छुक्लगुणस्यैव प्रकारत्वेन भानं जायते तृतीयं सतो भा
वः सत्त्वं तत्र जातावेव प्रत्यय इति दिक् ५५ ॥ दण्डीत्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकत्वात्तद्धितस्ये
तिवदन्तं मीमांसकं प्रत्याह ॥ अत्रार्थजातीयस्याद्दर्शनानां नवगामिनाम् सिद्धांते गास्थितं पदद्वयं वादिश्रुतक्षु
ण्ण ॥ अत्र भावप्रत्ययविषये नयाहि दामोदरत्वं पटत्वमित्यादौ भावप्रत्ययस्य संबंधानभिधायकत्वेन
मीमांसकानां दण्डित्वमित्यादिष्वपि तदभिधानं न स्यात् प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि तद
न्यभावप्रत्ययेनाभिधीयते अन्यथा घटत्वमित्यत्र द्रव्यत्वादेर्दण्डीत्यादौ दण्डादेस्तु तदन्यभावप्रत्ययवा
च्यतापत्तेः न च तन्मते दण्डीत्यादिबोधे संबंधः प्रकारः यत्र यद्वा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोपरः
न दण्डत्वेन तथाभावात्संबंधो वाच्यः प्राप्नोतीति न तु इत्यादेः संबंधवाचकत्वेनोपपन्नावगत्यभावात् प्रपं
चितं चैतद्दण्डादेव वैयाकरणभूषणे नन्वेवमपीदं वैषम्यं कथमित्यत आह सिद्धांतेऽस्त्विति जायते इति व
क्ष्यमाणेनान्वितम् सिद्धांते प्रकृतिजन्यबोधप्रकारत्वादयो जायते इत्यर्थः स प्रकृतिजन्यबोधप्रकारः
क इत्यत्र च पदद्वयं स्थितमिति योजना ५६ ॥ नौमहावाह ॥ प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारतां गे॰
धर्ममात्रं वाच्यमिति यद्वा शाब्दपरा[श्रि]मी ॥ जायते तज्जन्यबोधप्रकारे भावसंज्ञिते प्रयोगोपाधिर्निमित्तं प्र ३१
स्त्र॰

त॰

ष्ट्यर्थे प्रकारत्वतयाभासमानं धर्मं वाच्यतयाश्रित्य त्वादयो ज्ञायंते प्रवृत्तिनिमित्तबोधे प्रकारः त्वाद्यर्थ इ
ति यावत् तत्र घटत्वमित्यत्र प्रकारत्वात्त्वेन रूपेण भत्वप्रत्यये घटत्वस्यापि वाच्यता स्यादिति तं दोषं परिहरन्नाह धर्म ३॰
मात्रमिति न तत्र लक्षणगतविचार इत्यभिप्रायः तत्र व्यक्तिविशिष्टब्रह्मसत्तायां पदवृत्त्यादिरूपत्वात् । त॰
संबंधिभेदात्सत्तैव भिद्यमाना गवादिषु जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः तां प्रातिपदिकार्थं
च धात्वर्थं च प्रचक्षते सा नित्या सा महानात्मा तामाहुस्त्वतलादयः इति वाक्यपदीयात् उक्तं च तस्य
भावस्त्वतलाविति सूत्रे वार्तिककारैः यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति
यस्य गुणस्य विशेषणतयाभासमानस्य भावादाश्रयत्वाद्द्रव्ये विशेष्ये शब्दनिवेशः शब्दप्रवृत्तिस्तस्मिन्वा
च्ये त्वतलावित्यर्थः तथा च रूपादिशब्देभ्यो जातौ ष्यञ्‌ज्ञाणे दीर्घ महदादिभ्यो गुणे पाचकादिभ्यः क्रि
यायां घटादिशब्देभ्यो जातौ प्रत्ययः रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात् पाचकादिशब्दा
क॰ नां क्रियाप्रकारकबोधजनकत्वेन तेषां प्रत्ययः संसर्गप्रकारकबोधजनकत्वमिति मते च संसर्ग इति व्यव
स्थाया रूपपादे तिभावः तत्र जातिवाचकानां तु व्यंजकयपदशक्यतावच्छेदिकाः तथा च घटत्वमित्यत्र
२॰ घटशब्दस्यासाधारणो धर्म इति बोध इत्यादि द्रष्टव्यम् पदांतरमाह यद्वेति यद्वा सर्वे भावाः स्वेनार्थेन भवं
ति स तेषां भाव इति वार्तिकोक्तेः यद्वा शब्दस्य तत्त्वेन प्रयोजकोपि भवं तिवाचकत्वेन प्रवर्तते इति भा
वाः शब्दाः स्वेन रूपेणार्थेन भवंति प्रवर्तंते अतः स तेषां भावः प्रवृत्तिनिमित्तमित्यर्थः अयं भावः अर्थवत्त्व

स्वेनार्थेन भवंति॰

वै॰ भू॰ सा॰ ह्योपिद्विविधप्रकारः हरिहरेतलेत्वात्मकयथाथिष्टिरेववसिष्ठादिशब्देभ्यस्तन्नद्वाच्यः कश्चिदासीदितिशाब्दप्रका
रकबोधस्य सर्वसिद्धत्वात् अन्यथा वनौषधिवर्गादेर्नानार्थिकान्न्यत्वबोधकत्वापत्तेश्च एवमेवाप्रसिद्धा
पदे॰ र्थकपदेष्वप्यभावः सर्वसिद्धः ननु घटादिष्विवतत्त्वं जात्यादिरूपेण तथा चोभयं व्यवच्छेदकं यस्य तथाश
32 क्तिग्रहस्तस्य जात्यादिरूपेणोपस्थितिः पदप्रकारं शक्तिग्रहस्त्वविशिष्यत्वापेदितिः किं तत्र इदं कुचिद्व पदे॰
त्वादि त्वं साधकपदत्वादिरूपमपवापेदितिनत्रनिविशिष्यं वृत्तिहीन शक्तिभानस्येव बोधः तथा च शब्दोपित्वप्रत्यया
र्थ इति निरूपं चितं भूषणे ॥ इति वैयाकरणभूषणसारे भावप्रत्ययार्थविचारः समाप्तः ॥ साम्यदेवतेत्यत्र
देवताविशिष्टं देयं प्रत्ययार्थः ऐन्द्रं वैश्वदेवीत्यादौ इन्द्रादेर्देवतात्वस्य प्रकारान्तराभावात् तेन रूपेणोपस्थि
तये शक्तिकल्पनावश्यकत्वात् अत एवाभिमतादेवताज्ञानवदत्येवैष तद्धितः आमित्यादपदसान्निध्यान्न
स्यैवविषयार्थमणामिति केवलाद्देवतावाचीतद्धितोग्नेः समुच्चरन् नान्यथकश्चाग्निदेवत्यं प्रतिपादयितुं क्षम
इति च मीमांसकैरप्युक्तमित्याशयेनाह ॥ प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणं अभेदश्चात्र संसर्ग आ
ग्नेयादावियं स्थितिः देवतायां प्रदेये च विभागशः शक्तिरस्तु वा ॥ एकदेशो देवतारूपेतच्च विशेषणमभे
देनेत्याह अभेदस्त्विति ननु देवतायाः प्रत्ययार्थैकदेशत्वान्न प्रकृत्यर्थस्य तत्राभेदेनाप्यन्वय इत्यत आ
नाह देवतायामिति तथा च पदार्थैकदेशत्वेनास्तीति भावः ५० ॥ ननु आग्नेयादेर्द्देवस्य प्रकृतस्यैवला ज्ञे॰
भात्तत्र शक्तिः कल्प्या न च देवतात्वरूपेणोपस्थितये सा कल्प्यते प्रकृते लक्षणयैव तथोपस्थितिसंभ ढ़ै॰

वात् उपसर्गाणां द्योतकत्वनये प्रजयतीत्यत्र प्रकृष्टजयप्रत्ययवदित्यभिप्रेत्याह ॥ प्रदेशएववाशक्तिःप्र
कृतेत्वत्रलक्षणा देवतायांनिरूढेतिसर्वेपक्षाअमीस्थिताः ॥ नचपैन्द्रंदधीत्यादौद्रव्यस्यपदान्तरालाभा
त्तद्गतःपुनःप्रत्ययस्यतत्रशक्तिःकल्प्यतइतिवाच्यम् पदान्तराश्रवणेऽपितत्प्रतीतेः ऐन्द्रंदधीतिसामानाधिक
रण्याच्चअन्यथाख्यातस्यापिकर्तृकर्मवाचित्वंनस्यात् मीमांसकानांपुनःप्रत्ययस्यदेवतात्वमेवार्थोऽस्त
द्रव्यंपदान्तराल्लभ्यतएवेतिआख्यातस्यकर्तृवद्वाच्यत्वंमास्त्वितिऊनोऽनुशक्यतेवक्तुमितिदेवतायांदेवता दिक्
त्वरूपेणनिरूढेतिअत्रपक्षेविज्ञानपूर्वकत्वमनादिप्रयोगावच्छिन्नत्वंवातत्त्वमितिनयैवरीत्यान्यत्राप्यव भावः ॥ अ
धेयमित्याह ॥ क्रीडायांणस्तदस्यास्तीत्यादावेवमेवदिक्स्मृता वक्तृतोऽतिरिक्तेवेतिनात्रातीवप्रयुज्यते ॥
१० तदस्यांप्रहरणमिति क्रीडायांणोऽत्रप्रहरणविशिष्टाक्रीडाप्रहरणंक्रीडामात्रंवेत्यर्थः आदिनासोऽस्य क्रीडे
निवासःतस्मिन्नणीमासीतितदस्यास्त्यस्मिन्नितिमतुप् इत्यादिकंसंगृह्यते वृत्तिमात्रेतिरिक्तशक्तेःस
मर्थःपदविधिरितिसूत्रालाभादुक्तोविचारःशास्त्रान्तरीयैःसहनत्वस्मीयैवोक्तआरोपितप्रकृतिप्रत्ययार्थमा
दायवावस्तुतोविशिष्टशक्तेर्वार्थोपस्थितेरित्याह वस्तुतइति ॥ इतिवैयाकरणभूषणसारेदेवताप्रत्यया
र्थनिर्णयःसमाप्तः ॥ वृत्तिप्रसंगादत्राभेदैकत्वसंख्याप्रतीयतइतिसिद्धान्तेदृष्टान्तेनोपपादयति ॥ अभे
दैकत्वसंख्यायावृत्तौभानमितिस्थितिः कपिंजलालम्भवाक्येत्रित्वंन्यायाद्यथोच्यते ॥ संख्याविशेषाणा
मविभागेनसत्त्वमभेदैकत्वसंख्या उक्तंचवाक्यपदीये यथौषधिरसाःसर्वेमधुन्याहितशक्तयः अविभाग

वै॰
भू॰
३३

33

नवर्तेते संख्यांतांतारूपौ विडीवितिपरित्यक्तविशेषं वा संख्यासामान्यं च वनत उक्तं च ॥ भेदानां वा परित्यागात्संख्या
त्मा स तथाविधः व्यापाराज्जातिभागस्य भेदापोहेन वर्तते अगृहीतविशेषेण यथा रूपेण रूपवान् प्रख्याय-
इति॰ तेन शुक्लादिभेदापोहस्तु गम्यते ॥ अस्यां वृत्तौ समासादौ भानं न्यायसिद्धमिति शेषः इति मतस्थितिर्वैयाक
रणानां अयं भावः राजपुरुष इत्यादौ राज्ञो राज्ञोः राज्ञां वायं पुरुष इति जिज्ञासा जायते विशेषजिज्ञासा च सा
मान्यज्ञानपूर्विकेति सामान्यरूपेणानन्तप्रतीतिः शाब्दबोधविषयको भवतु तत्संख्याशाब्दिकैरिति न तस्याप[illegible]कत्वेन प्रती
तौ न्यायमाह कापिंजलेति गणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तद्रूपेणैव भानं द्वैकं स्य सर्वतः प्रथमोप त्वै व॰
स्थितत्वमस्तीति भावः वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा तथात्वे वा ज्ञानेच्छयोः सामान्यप्रकारत्वेन हेतुत्वम
ङ्गीकृत्यानुरूपेणैव वाच्यता स्यादिति ध्येयम् ॥ इति वैयाकरणभूषणसारे भेदैकत्वसंख्यानिरूपणं समाप्तम् ॥
संख्याप्रसंगादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति ॥ लट्प्रायेणाथात्संख्यायास्तंत्रातंत्रेम
तेयतः पश्चैकत्वादिहेतूनामाश्रयणमनाकरम् ॥ गृहं संमार्ष्टीत्युद्देश्यगृहगतमेकत्वमविवक्षित
विशेषणं॰ मिति वक्तास्माकमुद्देश्यविवक्षानियमः धातोरित्येकत्वस्याविवक्षितत्वात् उत्पद्येत समस्तेभ्यो धातुभ्यः प्र-
त्ययो यदि नदा सर्वैर्विशिष्येत तद्धोत्पन्नः स्वबर्थवत् इत्यादिशास्त्रे तत्राधिकरणे भट्टपादैरभिधानाच्च आर्ध
धातुकस्येड्वलादेरित्यत्र वाघार्थधातुकाविशेषणस्य वलादित्वस्याविवक्षितत्वाच्च एवं पशुना यजेतेति व गं॰
द्वितीयविशेषणं विवक्षितमित्यपि न वक्तव्यं दाभ्यां निष्ठातो नः पूर्वस्य च दः इत्यत्र नकारद्वयविधानानापत्तेः तथा ३३

श्री॰

ने.

चभिन्नइत्यत्रनकारद्वयलाभोनस्यात् ब्राह्मणाइत्यत्रैकत्वविवक्षयैवोपपन्नोप्येकःपूर्वपरयोरित्येकग्रह
णावैयर्थ्यापत्तेश्चेतिभावः शास्त्रार्थस्तुसंख्यायालक्ष्यान्तरेऽपार्णत्रान्तत्रैयतोमते अतःपश्चैकत्वाधिका
णोक्तहेतूनामाश्रयणेनासमासिद्धांतसिद्धमिति आदिनाग्रहैकत्वसंग्रहः ॥ ५५ ॥ ननुविधेयविशे
षणाविवक्षाआवश्यकी अन्यथानेननकारायापत्तेश्चभिन्नइत्यत्रनकारद्वयवदन्येषामप्यापत्तेः एकः
पूर्वपरयोरित्यत्रैकग्रहणंचस्यानिभेदादादेशभेदवारणायेत्यभिप्रेत्याह ॥ विधेयेभेदकंतत्रमन्य
तोनियमोनहि ग्रहैकत्वादिहेतूनामाश्रयणंसनाकरम् ॥ भेदकंविशेषणंतत्रविवक्षितंनविधेयवि
शेषणंविवक्षितमित्यस्तुतथाप्यनूनअनुवाद्यस्यनियमोनहिक्वचिन्नेत्रक्वचिन्नेत्यर्थः ग्रहैकत्वादे
योहेतूर्वाक्यभेदादिस्तस्यात्राश्रयणेनाकरम् एकत्वविशिष्टंधात्वेवलादित्वविशिष्टमार्धधातुकंवो
ह्यपप्रत्ययेडागमादेर्विधिसंभवादितिभावः ननुएवंभिन्नइत्यत्रनकारद्वयलाभेनस्यादित्यतआह ॥
वृत्तिभ्यांवाक्यभेदेननकारद्वयलाभतः दत्तिर्नैवात्तितंत्रत्वेविधेयभेदकस्यतु ॥ चकारस्त्ववितेनिष्ठा
तस्यनःपूर्वस्यदकारस्यचनःइतिवाक्यभेदमादायनकारद्वयलाभइत्यर्थः ॥ इतिवैयाकरणभूषणे
सारेसंख्याविवक्षानिर्णयःसमाप्तः ॥ क्त्वाप्रत्ययादेरर्थंनिरूपयति ॥ अव्ययकृतइत्युक्तेःप्रकृत्यर्थे
तुमादयःसमानकर्तृकत्वादिद्योत्यमेषामितिस्थितिः ॥ तुमादयःतुमुनादयःप्रकृत्यर्थेभावे आ
दिनाक्त्वादेःसंग्रहः भावेइत्यत्रमानमाह अव्ययकृतइति अव्ययकृतोभावेइतिकाादित्यर्थः ननुसमा

वार्ति.

वै॰ भू॰ सुधे नकर्तृकयोः पूर्वकाले इत्यादिसूत्राणां का गतिरत आह समानकर्तृकत्वादीति अयं भावः भोक्तुं पचति भु
क्त्वा व्रजतीत्यादावेकवाक्यता सर्वसिद्धा भोजनपाकक्रिययोर्विशेषणविशेष्यभावमंतरेणानुपपन्ना अन्य
थाभुंक्ते व्रजतीत्यादावेकवाक्यतापत्तेः तथा च तयोर्विशेषणविशेष्यभावनिरूपकसंसर्गो जन्यत्वं सामाना
३५ धिकरण्यं पूर्वोत्तरभावो वा व्याप्यत्वं चेत्यादिरनेकविधः तथा च भोक्तुं पचति भुक्त्वा व्रजतीत्यादौ भोजनजन
निका पाकक्रिया भोजनजन्या व्रजिरिति बोधः अत एव जलपानाद्यानंतर्यस्य लाभोऽत्रापि पीत्वा व्रज इति न
प्रयोगः सामानाधिकरण्यस्यापि संसर्गत्वेनार्थात्समानकर्तृकत्वं लब्धम् भुक्त्वा व्रजतीत्यादौ पूर्वोत्तरभावः
सामानाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणोत्तरकालिको व्रजनक्रियेति बोधः अधीत्य ति
ष्ठति मुखं व्यादाय स्वपितीत्यादौ चाध्ययनव्यादानयोरभावकाले प्रयोगात् यदा यदा स्थितिः स्वापश्च तदा
तदाध्ययनं मुखव्यादानं चेति कालविशेषावच्छिन्नव्याप्यत्वबोधात् व्याप्यत्वं सामानाधिकरण्यं च संसर्गः
एवं चान्यलभ्यत्वान्न सूत्रांशेषां वाच्यत्वलाभ इति फलमव्ययकृतो भावे इति एवं च प्रकृत्यर्थक्रिययोः संस
र्गे तात्पर्यग्राहकत्वरूपद्योतकत्वं क्त्वादीनाम् अत एव समानकर्तृकयोरिति सूत्रे स्वशब्देनोपात्तत्वान्नेति भा
ष्यप्रतीकमादाय योर्थपर्यै[illegible]द्योत्ये क्त्वादिर्विधीयते न तु विषय इति भावः इति कैयटः यत्तु समानकर्तृक
र्तृकयोरिति सूत्रात्समानकर्तृकत्वं वाच्यम् अन्यथौदनं पक्त्वाहं भोक्ष्ये इत्यत्र मयेति तृतीयाप्रसंगश्च न चा श्रे॰
ख्यातेन कर्तुरभिधानान्नसेति वाच्यम् भोजनक्रियाकर्तुरभिधानेऽपि पाककर्तुस्तदभावात् अनभि सुधे

क्त्वा॰

हितेभवतीतिपर्युदासाश्रयणात् अतएवप्रासादआस्तेइत्यत्रप्रसादनाक्रियाधिकरणस्याभिधानेप्यासि
क्रियाधिकरणस्यानभिधानात्सप्तमीतिभाष्येस्पष्टम् तस्मात्क्त्वाप्रत्ययस्यकर्तृवाच्यत्वमावश्यकमिति
तन्न सूत्रात्तस्यवाचित्वालाभात् समानकर्तृकयोःक्रिययोःपूर्वकालेक्त्वाइत्येवतदर्थात् अन्यथास
मानकर्तरीत्येवसूत्रन्यासःस्यात्तृतीयार्थपदेनेत आख्यातार्थक्रियायाःप्रधानभूतायाकर्तुःअभिधा
नात्अप्रधानानुरोधेनगुणेकार्यप्रवृत्तेर्नसंभवति उक्तंचवाक्यपदीये प्रधानेतरयोर्यत्रद्रव्यस्यक्रिययोः
पृथक् शक्तिर्गुणाश्रयातत्रप्रधानमनुरुध्यते प्रधानविषयाशक्तिःप्रत्ययैरभिधीयते यदागुणेत
दातद्वदनुक्तापिप्रतीयतेइति किंच अन्यथाकर्मणोपिक्त्वार्थतापत्तिः पक्त्वौदनोमयाभुज्यतेइत्यत्र
द्वितीयायाःप्रकारांतरेणावरणादित्यास्तांविस्तरः ॥ इतिश्रीवैयाकरणभूषणसारेक्त्वाद्यर्थनिर्णयः
समाप्तः ॥ सिद्धांतनिष्कर्षमाह ॥ वाक्यस्फोटोतिनिष्कर्षेतिष्ठतीतिमतस्थितिः साधुशब्देंतर्गताहि
बोधकानतुतत्स्मृताः ॥ यद्यपिवर्णस्फोटःपदस्फोटोवाक्यस्फोटः अखंडपदवाक्यस्फोटौ वर्ण
पदवाक्यभेदेनत्रयोजातिस्फोटाइत्यष्टौपक्षाःसिद्धांतसिद्धाइतिवाक्यग्रहणमनर्थकंदृष्टार्थकंच तथा
पिवाक्यस्फोटातिरिक्तानामन्येषाम[illegible]वास्तवत्वबोधनायतदुपादानम् एतदेवध्वनयति अतिनिष्कर्ष
इति मतस्थितिर्वैयाकरणानांमहाभाष्यकारादीनां तत्रक्रमेणसर्वांस्तान्निरूपयन्वर्णस्फोटंप्रथममा
ह साधुशब्देइति साधुशब्दांतर्गतावाचकाः नवेतिविप्रतिपत्तिःविधिकोटिरन्येषांनेतिवैयाकरण

वै० भू० रूप 35

नां साधकग्राहकं पचतितरामित्यादिप्रयुज्यमानैस्तरबन्तैः तिङ्विसर्गादय एव बोधका वाचकाः तस्यैव शक्तत्वस्य ग्रा
ह्यवस्थापितत्वात् न तु तैः स्मृता लादयः स्वादयश्चेत्यर्थः येन प्रयोगान्तर्गतास्तिबादय एव स्मारकाः स्वादी
नां न वाचकाः तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः पर्यायचक्रे ब्रह्मेत्यादावादेशाल्लुगादेरभावरूपस्य बोधकत्वा भू० न०
संभवाच्च किं तु तैः स्मृता लकाराः स्वादयश्च वाचकाः लत्वस्य जातिरूपतया शक्ततावच्छेदकत्वौचित्या
दव्यभिचाराच्च आदेशानां भिन्नतया परस्परव्यभिचारित्वात् लः कर्मणीत्याद्यनुशासनानुगुण्याच्च तथा
देशोऽप्यर्थबोधकमनुशासनमनुपलभामहे इत्याद्यः तान् साधकयुक्तिभिर्निराचष्टे ॥ व्यवस्थितेर्व्यवहृ
तेस्तङ्त्वन्यायतस्तथा किं चाख्यातेन शक्ताद्यैर्लडेव स्मार्यते यदि कथं कर्तृत्ववाच्यत्ववाच्यत्वे तद्विभावय
व्यवस्थानुरोधात् प्रयोगान्तर्गता एव वाचका न तु स्मृता इत्यर्थः तथाहि पचतीत्यादौ लकारमविदुषो बोधा पि०
त्तस्य वाचकत्वं न हि तेषां तद्दृष्ट्या शक्तिभ्रमाद्बोधः तस्य भ्रमत्वे मानाभावात् आदेशानामपि तत्तद्वैयाक
रणैः स्वेच्छया भिन्नाभिन्नार्थरूपात्मकः शक्तः को नेति व्यवस्थानापत्तेश्च सर्वेषां शक्तत्वे गौरवं व्यभि
चारस्तु सत्यैव आदेशानां प्रयोगान्तर्गततया नियतत्वाच्छक्यं तेषां शक्तत्वम् तथा चादेशस्मरणकल्प
नानैतिलाघवं साधकान्तरमाह व्यवहृतेरिति व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः स च श्रूयमाणानि
ज्ञातिष्वेवेति त एव वाचका इत्यर्थः किं च तङ्त्वन्यायेऽपि लकारस्य बोधकत्वे ध्व लडत्ततोऽपि बोधः स्या गो०
त् न तादृशबोधो भवतीति समभिव्याहारोऽपि कारणमिति चेन्न ज्ञापकत्वात् तस्य तादृश समभिव्याह रूप

न०

रस्यैव वाचकत्वशङ्किः अन्यथा लकारस्य वाचकत्वे समभिव्याहारस्य कारणत्वे चेत्युभयं कल्प्यमिति गौर
वं स्यात् तथा च तादृशसमभिव्याहारः समभिव्याहृतावर्णा इत्यत्र विनिगमकाभावात् प्रयोगान्तर्गता वर्णा
वाचका इति सिद्धान्तीति भावः अपि च लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकत्वव्यवस्था न स्यात् न
सिद्धान्तस्यादित्याह किंचेति आदेशानां वाचकत्वे तिङ्त्वेन भावनायामानत्वादिना कर्तरि शक्तिरित्युप
पद्यते विभाग इति भावः न च शानजादौ कृतिलिङ्कार्थे अथ शानजर्थ इत्यत्र कर्तरि कृदित्यनुशासना आ॰
दिति शंक्यं स्यान्त्वर्थे न निराकांक्षतया शानजादौ कर्तरीत्यस्याप्रवृत्तेः अन्यथाऽचजादावपि प्रवर्त्तेत १९ ॥
देवदत्तः पचमान इत्यादौ सामानाधिकरण्यानुरोधाच्छानचः कर्ता वाच्यः स्यादित्याशंक्याह ॥ तदवाचं
तनिङ्त्वात्तिनामनाकांक्षित्वस्वभावा नामार्थयोरभेदोपि तस्मात्स्त्वेवधार्यताम् अथादेशा वाचकास्तै
त्यदस्फोटस्ततः स्फुटः ॥ पचति तरां मैत्रः पचति कल्पं मैत्र इत्यादिसुनामार्थत्वाभेदान्वययोः संभव एवे
ति कर्तृवाचकता स्यादिति भावः न च पचति कल्पमित्यत्र सामानाधिकरण्यानुरोधात्कर्तरि लक्षणा पच
मान इत्यत्राप्याप्तत्वेरिति लः कर्मणि चेशासने च लादेशवाचकल्पितं लकारे कर्त्रादि वाचकत्वं कल्पितमा
दायेत्यक्रामिति वर्णस्फोटनिरूपणम् एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोपि सिद्ध एवेत्याह अप्येत्या
दि आदेशास्तिप्विसर्गादयः अयं भावः समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहार
रूपपदस्य वाचकता सिद्ध्यति प्रतिवर्णमर्थस्मरणास्यानुभवविरुद्धत्वात्प्रत्येकं वर्णानामर्थवत्त्वेन प्रातिप

वै॰ दिकत्वापत्तौ न लोपः प्रातिपदिकान्तस्येत्यादिभिरर्थवत्त्वमित्यादौ नलोपापत्तेश्च एतच्चरमवर्ण एव वाचक
भू॰ त्वशक्तिः शक्तेर्व्यासज्यवृत्तित्वे मानाभावात् पूर्वपूर्ववर्णानुभवजन्यसंस्कारास्तु चरमेणार्थधीजनने सहकारि वर्णेना
३६ ण इति तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतं दूषणायोक्तम् यामोस्तीति वक्ष्यमाणम् इत्यनेन न२०
36
वैयाकरणोक्तरमकारोच्चारणेर्थबोधापत्त्या नादृष्टात्रपर्याप्त्येव शक्ततावच्छेदकत्वौचित्यादिति दिक् १० ॥ स
मितिङ्गुंतं पदमिति परिभाषितपदस्य वाचकत्वस्वीकर्तॄणां मतमाह ॥ घटेनेत्यादिषु न हि प्रकृत्यादिभिदा
स्थिता वस्तुसादाविवेहापि संभ्रमो होहि दृश्यते ॥ घटेनेत्यादौ घटेति प्रकृतिः एनेति प्रत्यय इति विभाग
स्य सर्वैः सर्वपदादेशाइति स्वीकारे विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासंभवान्न वाचकत्वमित्यर्थः वैयाक
रणैर्विभागः कल्प्य इत्यनो दृष्टान्तव्याजेनाह वस्तुसादाविति बहुवचनस्य वस्तुसादिति समुदायस्यादेश
विधानान्न तद्विभागः संभवतीत्यर्थः ॥ ११ ॥ सुप्तिङ्गुंतचयरूपवाक्यस्यापि तदाह ॥ हरेवेत्यादिदृष्टौ च
वाक्यस्फोटं विनिश्चिनु अर्थैर्विशिष्य संबंधाग्रहणे चेत्समे पदे लक्षणादर्शनाच्चेन्नत्यदेश्यैव्यक्तिनत्रथा हरे
वविष्णो वेत्यादौ पदयोरेङः पदान्तादतीत्येकादेशेन तन्निविभागः स्फुटानः तथा च प्रत्येकपदाज्ञानेपिस
मुदायशक्तिज्ञानाद्बोधात्समुदायेप्यावश्यकी शक्तिः एवं प्रकृतिप्रत्ययेष्वविशिष्याज्ञायमानेष्वपि
समुदायस्तु त्वच्छ्यावबोधान्नत्राप्यावश्यकेव शक्तिरिति भावः वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यार्थबो गं॰
धइति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्येष्वप्यमेयेति पदवाक्यस्फोटौ व्यवस्थितौ अन्यथा घटपदेक ३६

पी

मंत्वमानयनंक्रान्तिरित्यादौनाहंशाब्दबुद्ध्यविरहितस्यापिबोधप्रसंगः घटमानयइत्यत्रैवपक्षेनाशुपश्यि॰
तौसत्यपितात्पर्यज्ञानेबोधाभावाच्च तत्रैवघटकर्मकमानयनमितिबोधेघटार्थकपदोत्तरंकर्मत्ववाच॰
कविभक्तेस्ततोधातोस्ततआख्यातस्यसमभिव्याहारःकारणमितिकार्यकारणभावज्ञानवतोबोधात्त
ज्ञानमपिहेतुरितिचेत्तर्हिसिद्धोवाक्यस्फोटः घटादिपदार्थबोधेबोधकतारूपपदशक्तिज्ञानस्यकार्य
कारणभावस्येवविशिष्टवाक्यार्थबोधेपदसमभिव्याहाररूपवाक्यनियतबोधकतारूपवाक्यशक्ति
ज्ञानस्यापिहेतुत्वकल्पनात् अर्थोपस्थापकज्ञानविषयशाब्दबुद्धिज्ञानकारणत्वस्यैवशक्तित्वात् एकं
पूर्व॰^ चैतत् विषयतासंबंधेनशाब्दबोधमात्रेबुद्धिज्ञानस्यलाघवेनहेतुत्वसिद्धेः विवेचितंचैतद्वैयाकरण
भूषणे ननुवाक्यार्थस्यापूर्वत्वात्कथंतत्रशक्तिग्रहइत्याशंक्याह अर्थेति वाक्यस्येतिशेषः वाक्यस्य
वाक्यार्थेविशिष्यशक्तिग्रहणंचेत्तर्हिपदेऽपिसमं पदेष्वन्वयांशे शक्तिविनुपदेऽपितद्ग्रहासंभवस्तु
ल्यइत्यर्थः यदिचपदशक्तिः पदार्थांशेज्ञाताअन्वयांशेज्ञातोपकल्प्यतइतिविवादाभ्युपगमस्तुल्यइति पुत्रशक्तिवादस्य
भावः ननुवृद्धव्यवहारंपश्यतोमनसापदार्थवद्वाक्यार्थेपितद्ग्रहइतिचेत्तुल्यमित्याह लक्षणादिति तावाक्यशक्तिर्मि
लक्ष्यतेनेनकथ्यतेनेनेतिलक्षणंमनस्तस्मात् अपिशब्दःपदोत्तरंबोध्यः पदेऽपिलक्षणात्तद्ग्रहस्येवर्षस्तु॰ मापप्रज्ञातेर्बोध
युज्यतइति^
पूर्वः वाक्येपिइति^ ~~[illegible]~~ वक्तृतत्समुदितार्थे
विशिष्टवाक्यस्यैवप्रथमंतद्ग्रहः आवापोद्वापाभ्यांपरंप्रत्येकंतद्ग्रहइतिबोध्यम् ११ ॥ इयमेवमीमांस

वै॰ भू॰ ३२

37

कानांवेदांतैकदेशिनांचगतिरित्याह ॥ सर्वत्रैववहिवाक्यार्थोलक्षणयैवेतियेविदुः भाट्टास्तेपीत्थमेवाऽलक्ष
णायाग्रहेगतिम् ॥ भाट्टाइतितदनुयायिनांवाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणंस्फुटमेतत् नत्वक्त
पक्षद्वयमनुपपन्नम् अत्यंतैरभिव्यक्तैर्वैकदासंभवेनवर्णसमूहरूपपदज्ञानासंभवात् तथाच सुतरांतत
समूहरूपवाक्यज्ञानासंभवइतिचेन्न उत्तरवर्णप्रत्यक्षसमयेतस्मिन्नव्यवहितोत्तरत्वसंबंधेनोपस्थित
पूर्ववर्णावच्छिन्नेतथातदुत्तरप्रत्यक्षकालेउपस्थितविशिष्टतद्वर्णावच्छिन्नेतस्मिन्क्षणेरहमितिताहृशानुपूर्वीघ
टितपदत्वस्यैववाक्यस्यग्रहणात् ॥ ३४ ॥ इदानीमखंडपक्षमाह ॥ पदेनवर्णाविद्यंतेवर्णेष्वव
यवानच वाक्यात्पदानामत्यंतंप्रविवेकोनकश्चन ॥ पदेपचतीत्यादौनवर्णाःउतोवर्णसमूहःपदमि
तिशेषः दृष्टांतव्याजेनाह वर्णेष्विति पकारैकारलकारअकारादिवर्णेष्ववयवाप्रतीयमानाअपियथा ना॰
नेत्यर्थः क्वचिदिवेत्येवपाठः एवंवाक्येप्याह वाक्यादिति पदानामपिवाक्याद्विवेकोभेदोनास्तीत्यर्थः
अयंभावः वाक्यंपदंवाखंडमेव नतुवर्णसमूहः अनंतवर्णकल्पनेमानाभावात् तत्तद्वर्णोत्पादकत्वे
नाभिमतवायुसंयोगनिष्ठेनतत्तद्वर्णजनकतावच्छेदकतायावावच्छेदकंवैजात्यमादायैवककारोगकारइ
त्यादिप्रतीतिवैलक्षण्यसंभवात् स्पष्टंहिभास्वत्यांतारत्वादिवायुनिष्ठंवर्णेष्वारोप्यतेइत्युक्तंदेवताधिकर
णे नचैवंवायुसंयोगएववाचकःकिंतस्मादितिवाच्यम् प्रत्यक्षोपलभ्यमानककारादेरेववाचकत्वस्या गं॰
नुभवसिद्धत्वात् तथाचवाचकत्वान्यथानुपपत्त्यातदेवेदंवाक्यंसोयंगकारइतिप्रतीत्याचस्फोटोखंडः ३२

सिध्यति एतेन गौरित्यादौ गकारौकारविसर्गादिविवेकेण स्फोटाननुभवाच्छ्रूयमाणवर्णानामेव वाचक
त्वमस्त्वित्यपास्तं तेषां स्फोटातिरिक्तत्वाभावात् यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः
समुदायस्य तत्क्रमवर्त्तामाशुतरविनष्टानां तथैवाभिव्यक्तानां वा ज्ञानमसंभवत्येव पूर्वपूर्ववर्णानुभवसं
स्कारसहकारेणैकदा समूहालंबनरूपसकलज्ञानसंभवस्तु सरो रसः जरा राजनदी दीनादिसाधार
णाद्यनतिप्रसंगाद्ध्वनिस्फोट एवावर्णो नादाभिव्यंग्यो वाचक इति कथ्यते: तन्न युक्तम् पदज्ञानसंभवस्यो व॰
पपादितत्वात् वर्णानां प्रत्येकं व्यंजकत्वं समुदितानां वेत्यादिविकल्पग्रासाच्च नन्वेतन्मतेऽप्येष दोषः १
न तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यंजकत्वं समुदितानां वेति विकल्पस्य संभवादि
ति चेत् उच्यते प्रत्येकमेव संयोगा अभिव्यंजकाः परंतु केचिड्डत्वेन केचिद्दोत्वेनेत्यनेकप्रकारैः अतएव
वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते एवं चाव्यवहितोत्तरत्वसंबंधेन घवत्वं टकारे गृह्यत इत्येतादृश
घ॰ पदज्ञानकारणतया विवादात् परंत्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यं
अतएव ज्ञानानंतरज्ञानविषयत्वरूपानुपूर्वीत्यादिनैयायिकवृद्धानां व्यवहारः एवं च न कश्चिद्दोषः
एतेन पर्यायस्थले ह्येक एव स्फोटो नाना वा नाद्यः घटपदेन गृहीतशक्तिकस्य कलशपदाद्बोधप्रसं
गात् न च तत्पर्यायाभिव्यक्ते स्फोटे शक्तिग्रहस्तत्पर्यायश्रवणेऽर्थधीहेतुरिति वाच्यम् एवं प्रतिपर्यायं
शक्तिग्रहावश्यंभावेन तत्तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वात् तथा सति शक्तिग्रहत्वेनैव हेतुत्वे

वै० भू० २५ 38

लाघवञ्च अन्यथा तत्पर्यायाभिव्यक्तिगतशक्तिग्रहत्वेन तत्त्वे गौरवात् नादृतीयः अनंतपदार्थानां तेषां शक्तिं
चापेक्ष्य लाघवमतोऽष्टैव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तम् पर्यायेष्वनेकशक्तिस्वीकारस्य
सर्वसिद्धत्वात् तदवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक् शाब्दकौस्तुभे तु वर्णमालायां पदमिति प्रती
तेर्वर्णातिरिक्त एव स्फोटः अन्यथा कपालातिरिक्तघटासिद्धिप्रसंगश्चेति प्रतिपादितम् २५ ॥ नन्वेवं शा
स्त्राप्रामाण्यप्रसंगः पदस्याखंडत्वात् शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशंकां
समाधत्ते ॥ पंचकोशादिवत्तस्मात्कल्पनैषा समाश्रिता उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ॥ उपे
यप्रतिपत्त्यर्थेत्यंतेनान्वयः अयंभावः यथा आनंदवल्ल्यामन्नप्राणमनोविज्ञानानंदमयात्मकं पंचकोश
५७ व्युत्पादनं वास्तवब्रह्मबोधनाय एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति न तु
प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसंभवाच्छास्त्रं तदुपायमित्यत आह उपाया इति उपायस्योपयोत
रादूषकत्वात् तथा च व्याकरणाभ्यासजन्यज्ञानवैजात्यं कल्प्यते मंत्रजन्यमिवार्थस्मरणे वेदांतजन्यमि
व ब्रह्मज्ञाने तस्य च ज्ञानस्य यज्ञादीनामंतःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः साक्षात्परंपरया वा
स्वर्गमोक्षहेतुत्वं च तदुक्तं वाक्यपदीये तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् पवित्रं सर्वविद्याना
मधिविद्यं प्रकाशते इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः गं०
अत्रातीतविपर्यासः केवलामनुपश्यतीति नचालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोध २५

पः तस्याऽलीकत्वंसिद्धेर्वक्ष्यमाणत्वात् एवंवैयाकरणन्यायमादिनादूष्यते ४४ ॥ ननुस्फोटस्यवर्णजा
तीनांचनित्यतयाककारउत्पन्नइतिनस्यात् वायुसंयोगाभिव्यङ्ग्याज्जातेः स्फोटेभानेककारादिप्रतीतीनांभ्र
मत्वापत्तिरित्यतआह ॥ कल्पनानामुपाधित्वंस्वीकृतंहिपरैरपि स्वरदैर्घ्यादयोऽपिह्यन्येवर्णेभ्योऽन्यस्य
मन्वते ॥ स्वीकारस्थलमाह स्वरदैर्घ्यादयोपीति आदिनोत्पत्तिविनाशसंग्रहः उदात्तत्वादिनवर्णनिष्ठं
तस्यैकत्वान्नित्यत्वाच्च तदेवेदमेवायमितिप्रत्यभिज्ञानात् नचागत्वावच्छिन्नप्रतियोगिताकभेदाभाव
स्तद्विषयः व्यक्त्यंशेभेदस्यापिभासमानस्यविनाबाधकंत्यागायोगात् नचोत्पत्तिप्रतीतिर्बाधिकाप्रा
गसत्त्वेसतिसत्त्वरूपायाउत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात् अतएववर्णमुच्चारयतीतिप्रत्ययोनतूत्पाद
यतीतिप्रत्ययोव्यवहारश्च उच्चारितत्वंचताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वं किंचव्यंज
कध्वनिनिष्ठोत्पत्त्यादेः परंपरयावर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेः नह्यतिरिक्तवर्णसाधिकाप्रत्यव
यावर्णनिष्ठत्वाभ्युपगमाच्चनभ्रमत्वं साक्षात्संबंधांशेभ्रमइत्यवशिष्यते तदपिसोयमित्यत्रव्यक्त्य
भेदांशेनवभ्रमत्ववत्तुल्यम् परंतुममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पनानेतिलाघवमतिरिच्यते
नचवर्णस्थलेध्वनिसत्त्वेमानाभावः तदुत्पादकशङ्खवाद्यभावेनतत्संभवश्चेतिवाच्यं ककाराद्युच्चारण
स्थलेतत्तत्स्थानस्यजिह्वायाईषदंतरयानेवर्णानुत्पत्तेर्धर्मस्तत्त्वजेश्चदर्शनाज्जिह्वाभिघातेन वायुकंठसं
योगादेर्ध्वनिजनकत्वकल्पनात् तस्यचवर्णोत्पत्तिस्थलेपिसत्त्वात्तेनैवप्रतिबध्यप्रतिबंधकभावकल्प

नानिष्पन्नमाणिक्यो स्यादिति गौरवं विपरीतं एवं परस्परविरोधाद्ध्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं का
क्तमिति तेषामपि प्रायः एवं चोत्पन्नत्वादिप्रतीतीनां तत्प्रयोजकत्वस्य चानिर्वाहः परेषामपि समान इति प्रतिबंधे
चोत्तरमिति भावः ६९ ॥ इत्थं च व्यक्तिस्फोटः जातिस्फोटमाह ॥ शक्यत्वइवशक्तत्वेजातेर्लाघवमीक्ष्य
ताम् औपाधिको वा भेदोस्तु वर्णानां तारमंद्रवत् ॥ अयं भावः वर्णास्तावदावश्यकाः उक्तरीत्या सोयं गका
र इति वचोयं गकारः श्रुतः सोयं हकार इत्यपि स्यात् स्फोटस्यैकत्वात् गकारेण हकार इत्यनापत्तेश्च

किंच स्फोटे गत्वाद्यपेयं न वा आद्ये तु गकारोस्तु वर्णे नित्यतावादिभिरतिरिक्तगत्वानंगीकारात् तथा चा
तिरिक्तस्फोटकल्पने एव गौरवं अंते गकारादिप्रतीतिविरोधः वायुसंयोगवृत्तिर्ध्वनिवृत्तिर्वा वैजात्यमा
रोप्य तथाप्रत्ययइति चेन्न प्रतीतिर्विनाबाधकं भ्रमत्वासंभवात् अस्तु वा वायुसंयोगएव गकारोपि न
स्यात् अतींद्रियत्वं दोषइति चेद्धर्मवदुत्पत्तेरित्युक्तं स्फोटेन तस्मान्नित्या एव वर्णाः परं तु न वाचकाः गौरवात् अ
क्त्यधिकरणन्यायेन जातेरेव वाच्यत्वत्तद्वाचकत्वस्यापि युक्तत्वाच्च इदं हरिपदमित्यनुगतप्रतीत्या हर्य
पस्थितत्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात् नच
वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः घटघटत्वादेरपि संयोगविशिष्टस्वदाकारादिभिश्चान्यथा
सिद्ध्यापत्तेः तस्माज्जातिरेव वाचिका नानापूर्व्येणावच्छेदिका चेति ननु सरो रस इत्यादौ जात्योः सत्त्वादर्थभे
दबोधो न स्यादित्यत आह औपाधिको वेति वा त्वर्थे उपाधिरानुपूर्वी सैव जातिविशेषस्याभिव्यंजिकेति

भेदः कारणीभूतज्ञानस्येतिनानातिप्रसंगइतिभावः उपाधिप्रयुक्तज्ञानवैलक्षण्येव्यक्तिमाहवर्णा॰
नामिति १८ ॥ ननुजातेःप्रत्येकवर्णेष्वपिसत्त्वात्प्रत्येकादर्थबोधःस्यादित्यतआह ॥ अनेकव्यक्ति
भिर्व्यंग्याजातिःस्फोटइतिस्मृता केश्चिद्व्यक्तयएवास्याध्वनित्वेनप्रकल्पिताः ॥ अनेकाभिर्वर्णव्यक्ति
भिरभिव्यक्ताचजातिः स्फोटइतिस्मृता योर्थंतयाबोधिकेतियावत् एतेनस्फोटस्यनित्यत्वात्स॰
पं॰ र्वदाबोधापत्तिरित्यपास्तम् अयंभावः यद्यपिवर्णस्फोटःकथितदोषोस्ति तथापिपदवाक्ययो
र्नतत्रतस्याव्यासज्यवृत्तित्वस्यधर्मिग्राहकमानसिद्धत्वादितिकेश्चिद्व्यक्तयोध्वनयएवध्वनिवर्णयोर्द्व
यभेदाभावादित्यभ्युपेतइतिशेषार्थः उक्तंहि [illegible] काव्यप्रकाशे बुधैर्वैयाकरणैःप्रधानीभूतस्फो
टरूपव्यंग्यव्यंजकस्य शब्दस्यध्वनिरितिव्यवहारःकृतइति ननुकासाजातिस्तत्राह ॥ सत्यासत्यौतुयौ
भागौप्रतिभावंव्यवस्थितौ सत्यंयत्तत्रसाजातिरसत्याव्यक्तयोमताः ॥ प्रतिभावंप्रतिपदार्थं सत्यो
ऽशोजातिःअसत्याव्यक्तयः तत्तद्व्यक्तिविशिष्टंब्रह्मैवजातिरितिभावः उक्तंचकैयटे असत्योपाधिवच्छि
न्नंब्रह्मतत्त्वंद्रव्यशब्दवाच्यमित्यर्थः इतिब्रह्मतत्त्वमेवशब्दरूपतयाभातीतिच कथंतर्हिब्रह्मद
र्शनेचगोत्वादिजातेरप्यसत्त्वादनित्यत्वे आत्मैवेदंसर्वमितिश्रुतिवचनादितिकय्यटःसंगच्छताम्
अविद्याअविद्यकोधर्मविशेषोवेतिपक्षांतरंमा[illegible]येतिद्रष्टव्यम् तमेवसत्यांशंस्पष्टयति ॥ इ
त्यंनिष्कृष्यमानंयच्छब्दतत्त्वंनिरंजनम् ब्रह्मैवेत्यक्षरंप्राहुस्तस्मैपूर्णात्मनेनमः ॥ अयंभावः नामरू

वै॰ भू॰ ५०

40

वैयाकरणानीति सिद्धान्तद्वयी सूचिता तत्र रूपस्य वनाद्यारोपितत्वं प्रक्रियायां शास्त्रविषयावि
विजृंभणमात्रं उक्तं च वाक्यपदीये शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते समारम्भस्तु भावाना
मनादिब्रह्म शाश्वतमिति ब्रह्मैवेत्यनेनात्रायं पुरुषः स्वयंज्योतिः तमेव भान्तमनुभाति सर्वं तस्य
भासा सर्वमिदं विभातीति सिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोस्मादिति स्फोट इति यौगिकस्फो
टशब्दाभिधेयत्वं सूचयति निर्विघ्नप्रचयायान्ते मंगलस्तुतिनिरूपणमाह पूर्णात्मने इत्यादिना ॥
अशेषफलदातारमपि सर्वेश्वरं गुरुम् श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥ इति श्रीमद्वाक्य
प्रमाणपारावारपारीणधुरीणरंगोजिभट्टात्मजकौण्डभट्टकृते वैयाकरणभूषणसारे स्फोटवादः
समाप्तः ॥ ॥ शुभमस्तु सर्वजगतामिति शुभम् ॥ ॥ ॥ ॥

वाक्यन्यायपदान्वयेषु नतधियां प्राणः कवीनां तथा सीमा यत्र वसुधर शास्त्रबहुलं ब्रह्माऽपि निर्वर्ण्यते तद्वैयाकरणव्रतं
सततमिति ख्यातं समिद्धिक्रमी प्राकेर्यर्षिकृतीनु सम्मितहृद्यालीलिखद्धिन्दे ॥

शे॰ ५०

पत्रे ४०

श्लोकसंख्या

सहस्रं १ शतं ४

२-।।

संख्या १२५०

वैयाकरणभूषण

श्लोक १४००

कागदनाह २